श्यपो द्वितीयायाआत्रेय स्तृतीयायाःकश्यप स्ततोद्व
योर्गौतम स्ततएकस्याःकण्व स्ततोद्वयोर्मरुत्वां स्ततए
कस्याभगवाँ स्ततस्तिसृणांनारद स्ततस्तिसृणांभग
वान् द्वितीयानुवाकस्यमंडूक स्तृतीयानुवाकस्यभगवाँ
श्चतुर्थानुवाकस्यदुर्वासाः पंचमषष्ठानुवाकयोर्भगवान्
सप्तमानुवाकस्यहेमकोशो ऽष्ठमानुवाकस्यनवमानुवाके
चनमोवइतियावद्भगवा नवशिष्टस्याग्नि र्दशमानुवाके
प्रथमस्यपुलहो द्वितीयस्यस्कंद स्ततोद्वयोर्मांडव्य स्त
तएकस्यदेराट् ततएकस्यभगवाँस्ततएकस्यात्रि स्ततए
कस्यवैय्याघ्र स्ततएकस्यभगवाँ स्ततएकस्यवैराज स्त
तएकस्यपुलह स्ततएकस्यनारद स्ततएकादशानुवाके
आद्यानांचतुर्णांदुर्वासा स्ततआसमाप्तिर्देवल इत्यृष
यः ॥ प्रथमानुवाकेआद्यस्यरुद्र स्ततएकस्यशंभु स्तत
एकस्यस्कंदात्मारुद्र स्ततोद्वयोरुद्र स्ततएकस्यशंभुस्त
तोद्वयोरादित्यात्मारुद्रस्ततएकस्यशंभुस्ततस्तिसृणांरु
द्र स्ततस्तिसृणांभगवां स्ततोद्वितीयत्रितीयानुवाक
योरुद्र स्ततश्चतुर्थपंचमषष्ठानुवाकानांशंभुः सप्तमानु

सू. वाकस्यरुद्रो ऽष्टमानुवाकस्यनमोवःकिरिकेभ्यइत्यंत
स्यचनवमस्यभगवानदशिष्टस्यरुद्रो दशमानुवाकेचतु
र्णांरुद्र स्ततएकस्यनंदीश्वरात्मारुद्र स्ततएकस्यभवा
गवां स्ततएकस्यशंभु स्ततएकस्यरुद्र स्ततएकस्यभग
वां स्ततोद्वयोःशंभु स्ततोवशिष्टानांरुद्र इतिदेवताः
॥ प्रथमानुवाकेआद्येनुष्टुभौ ततएकास्वरालनुष्टुप्
ततएकानिचृदनुष्टुप् ततएकानुष्टुप् ततएकानिचृ
दनुष्टुप् ततएकाप्रस्तारपंक्तिः पंचपदापंक्तिर्वा त
तएकाषट्पदाजगती ततःसप्तानुष्टुभ स्ततोष्टानुवाका
यजूंषि ततएकाप्रस्तारपंक्तिः पंचपदापंक्तिर्वा ततएका
नुष्टुप् ततश्चतस्रोजगत्य स्ततस्तिस्रस्त्रिष्टुभ स्ततए
कापंचपदात्रिष्टुप् महाबृहतीवा ततोद्वादशानुष्टुभस्तत
स्त्रीणियजूंषि ततस्तिस्रोनुष्टुभ स्ततएकायजुरितिछं
दांसि ॥ अथचमकानांअग्निकांडऋषिः आद्याआग्ना
वैष्णवीगायत्री शिष्टानांवाजादयोन्नादिविशेषादेवता
यजुः ॥ अभिषेके विनियोगः ॥ इत्यृष्यादयः ॥

पुरुषसूक्तंयथा *॥ ॐसहस्रशीर्षापुरुषःसहस्राक्षःस
हस्रपात् ॥ सभूमिंविश्वतोवृत्वात्यतिष्ठद्दशांगुलं ॥१॥

टी. १. पुरुषसूक्त आरीते. *

पुरुषएवेदंसर्वंयद्भूतंयच्चभव्यं ॥ उतामृतत्वस्येशानोय
दन्नेनातिरोहति ॥ २ ॥ एतावानस्यमहिमातोज्यायां
श्चपूरुषः ॥ पादोस्यविश्वाभूतानित्रिपादस्यामृतंदि
वि ॥ ३ ॥ त्रिपादूर्ध्वउदैत्पुरुषःपादोस्येहाभवत्पुनः ॥
ततोविष्वङ्व्यक्रामत्साशनानशनेअभि ॥ ४ ॥ तस्मा
द्विराळजायतविराजोअधिपूरुषः ॥ सजातोअत्यरिच्य
तपश्चाद्भूमिमथोपुरः ॥ ५ ॥ यत्पुरुषेणहविषादेवायज्ञ
मतन्वत ॥ वसंतोअस्यासीदाज्यंग्रीष्मइध्मःशरद्धविः
॥ ६ ॥ तंयज्ञंबर्हिषिप्रौक्षन्पुरुषंजातमग्रतः ॥ तेनदेवा
अयजंतसाध्याऋषयश्चये ॥ ७ ॥ तस्माद्यज्ञात्सर्वहुतः
संभृतंपृषदाज्यं ॥ पशून्तांश्चक्रेवायव्यानारण्यान्ग्रा
म्याश्चये ॥ ८ ॥ तस्माद्यज्ञात्सर्वहुतऋचःसामानिज
ज्ञिरे ॥ छंदांसिजज्ञिरेतस्माद्यजुस्तस्मादजायत ॥ ९ ॥
तस्मादश्वाअजायंतयेकेचोभयादतः ॥ गावोहजज्ञिरे
तस्मात्तस्माज्जाताअजावयः ॥ १० ॥ यत्पुरुषंव्यद
धुःकतिधाव्यकल्पयन् ॥ मुखंकिमस्यकौबाहूकाऊरूपा
दाउच्येते ॥ ११ ॥ ब्राह्मणोस्यमुखमासीद्बाहूराजन्यःकृ

तः ॥ ऊरूतदस्ययद्वैश्यःपद्भ्यांशूद्रोअजायत ॥ १२ ॥
चंद्रमामनसोजातश्चक्षोःसूर्योअजायत ॥ मुखादिंद्रश्चा
ग्निश्चप्राणाद्वायुरजायत ॥ १३ ॥ नाभ्याआसीदंतरिक्षं
शीर्ष्णोद्यौःसमवर्त्तत॥ पद्भ्यांभूमिर्दिशःश्रोत्रात्तथालो
काँअकल्पयन् ॥ १४ ॥ सप्तास्यासन्परिधयस्त्रिःसप्तस
मिधःकृताः ॥ देवायद्यज्ञंतन्वानाअबध्नन्पुरुषंपशुं ॥
१५ ॥ यज्ञेनयज्ञमयजंतदेवास्तानिधर्माणिप्रथमान्यास
न् ॥ तेहनाकंमहिमानःसचंतयत्रपूर्वेसाध्याःसंतिदेवाः
॥ १६ ॥ श्रीशिव०मः ॥ आचमनीयंस०मि ॥ ॐतंय
ज्ञं०श्चये॥श्रीशिव०मः ॥ वस्त्रंस०मि ॥ ७ ॥ श्रीशि
व०मः ॥ आचमनीयंस०मि ॥ ॐतस्माद्यज्ञात्सर्वहुतःसं
भृतं०श्चये । श्रीशिव०मः । यज्ञोपवीतंस०मि ॥ ८ ॥
श्रीशिव०मः आचमनीयंस०मि॥ ॐतस्माद्यज्ञात्सर्वहु
तऋचः०यत । श्रीशिव०मः ॥ गन्धंस०मि॥ ९ ॥ ॐ
तस्मादश्वा०वयः॥ श्रीशिव०मः ॥ पुष्पंस०मि॥१०॥
मूलमन्त्रेण[1] बिल्वपत्रार्पणं तुलसीसमर्पणं च ॥ *
ॐयत्पुरुषंव्यदधुः०च्येते ॥ श्रीशिव ० मः । धूपंस०

टी. १. मूलमंत्रेकरी बिल्वपत्र अर्पण करवुं अने तुलसी पण अर्पण करवी ॥*

मू. मि॥११॥ ॐब्राह्मणोस्य० यत॥श्रीशिव०मः॥दीपं स०मि ॥ १२ ॥ ॐचंद्रमामनसो०यत॥ श्रीशिव०मः ॥ यथांशतोनैवेद्यंस०मि ॥ १३ ॥ श्रीशिव०मः ॥ आचमनीयंस०मि ॥ मूलमंत्रेणवैदिकमंत्रेणचनीराजनं यथा ॥ * ॐनमःशिवाय ॥ ॐयेदेवासोदिव्येकादशस्थ पृथिव्यामध्येकादशस्थ॥अप्सुक्षितोमहिनैकादशस्थते देवासोयज्ञमिमंजुषध्वं ॥ श्रीशिव०मः । नीराजनंस०मि ॥ ॐनाभ्याआसी०यन् ॥ श्रीशिव०मः ॥ नमस्कारंसम०मि॥१४॥ ॐसप्तास्यासन्०पशुं॥श्रीशिव०मः ॥ प्रदक्षिणांस०मि ॥ १५ ॥ ॐयज्ञेनयज्ञ०देवाः॥ श्रीशिव०मः॥ पुष्पाञ्जलिंस०मि ॥१६॥ ततोमूलमन्त्रमष्टोत्तरशतंजपेत्॥*अस्यश्रीशिवपञ्चाक्षरमन्त्रस्य वामदेवऋषिः ॥ अनुष्टुप्छन्दः ॥ श्रीशिवोदेवता ॥ जपेविनियोगः॥ॐनमःशिवाय ॥ इतिमूलमन्त्रंजप्त्वा ॥ अनेनजपेनश्रीशिवःप्रीयतां ॥अनेनपूजनेनश्रीविष्णुसूर्यविनायकशक्तिपरिवृतश्रीशिवःप्रीयतां॥ इतिपूजांजपं

टी. १. मूलमंत्रे अने वैदिकमंत्रेकरी नीराजन (आरती) करवुं ते आरीते. *

२. ते पछी मूलमंत्र एकसो आठवार १०८ जपवो. *

३. एरीते मूलमंत्र जपी " अनेन ज०प्रीयतां । अनेन पू

चनिवेद्यदेवंप्रार्थयेत्॥तत्रमन्त्राः॥*प०॥मन्त्रहीनंक्रियाहीनंभक्तिहीनंसुरेश्वर ! ॥ यत्पूजितंमयादेवपरिपूर्णंतदस्तुमे ॥१॥आवाहनंनजानामिनजानामितवार्चनम् ॥ पूजांचैवनजानामिक्षम्यतांपरमेश्वर !॥ २ ॥ अन्यथाशरणंनास्तित्वमेवशरणंमम ॥ तस्मात्कारुण्यभावेनक्षमस्वपरमेश्वर!॥ ३ ॥ भूमौस्खलितपादानांभूमिरेवावलम्बनं॥ त्वयिजाताऽपराधानांत्वमेवशरणंविभो!॥ ४ ॥* इतिप्रार्थ्य॥प०॥शङ्खमध्येस्थितंतोयंभ्रामितंकेशवोपरि ॥ अङ्गलग्नंमनुष्याणां ब्रह्महत्यांव्यपोहति *॥१ ॥ इतिदेवोपरिशङ्खोदकंभ्रामयित्वाजलंशिरसिचाभ्युक्ष्य॥प०॥ "अकालमृत्युहरणं ब्रह्महत्याविनाशनं ॥ रोगघ्नंपुण्यदंपास्येसुरपादावनेजनम् * " ॥इतिमन्त्रेणदेवतीर्थंपावेजलंमितिसंक्षेपः ॥ इतिदेवपूजाप्रयोगः॥

टी. जनेन०प्रीयतां " एरीते जप अने पूजा निवेदनकरी देवनी प्रार्थना करवी तेना मंत्रो *

१. एरीते प्रार्थना करी " शंखमध्ये० व्यपोहति " ए मंत्रे देवोनी उपर शंखोदकने फेरवी ते जलने माथा उपर छांटी "अकाल०जनं " एमंत्रवडे देवने नवरावेला जलनुं पान करवुं एरीतेसंक्षेपछे.

एरीते देवपुजानो प्रयोग पुरो थयो.

सू०॥ एवंपूजाकरणाशक्तौपञ्चोपचारैर्वापूजयेत् ॥
तत्प्रयोगः ॥ आचम्यप्राणानायम्य ॥ देशकालौ
सङ्कीर्त्य ॥"श्रीशिवप्रीतयेनित्यविधिरूपांश्रीविष्णुसूर्य
विनायकशक्तिपरिवृतश्रीशिवपूजांकरिष्ये"॥ इतिसङ्क
ल्प्य ॥"कलशेवरुणमावाहयामि" ॥ इत्यावाह्य॥"ॐ
वरुणायनमः ॥ गन्धपुष्पेसमर्पयामि"॥ ततःशङ्खं सं
स्नाप्य ॥ "पाञ्चजन्यायनमः ॥ गन्धपुष्पेस०मि" ॥
घण्टांसंस्नाप्य ॥"ॐजगत्ध्वनिमंत्रमातःस्वाहानमः ॥
गन्धपुष्पेस०मि" ॥ इतिघण्टांसंपूज्य ॥ शङ्खंप्रणवेना
द्भिः पूरयित्वातेनोदकेनात्मसहितंपूजासंभारंसंप्रोक्षेत्
॥ * श्रीशिवविष्णुसूर्यविनायकशक्तिभ्योनमः ॥ स्ना

टी. एरीते पूजाकरवा अशक्तहोय त्यारे पांच उपचारो व
डे पूजन करवुं तेनो प्रयोग आरीते ॥ आचमन अने प्राणा
याम करी पृष्ठ २०ना टीप्पणमां लख्यामुजब देशकालनुं की
र्तन (संकल्प) करी "श्रीशिव०रिष्ये"। एरीते संकल्प करी
"कलशेव०मि"एरीते वरुणनुं आवाहन करीने"वरु०मःगंध०
मि"। एमंत्रे पूजन करी तेपछी शंखने नवरावीने "पांच०मः
गंध० मि"। ए मंत्रे शंखने पूजी घंटाने नवरावी "ॐजगत्ध्व०
मःगंध०मि"। एरीते घंटाने पूजीने शंखनेप्रणव(ॐ)वडे जले
भरी तेजलवडे पोतासहीत पूजाना साहीत्यनुं प्रोक्षण करवुं*

मू.नंसमर्पयामि॥स्नानेधूपेचदी
दिति आदौसंस्नापयेत् ॥ ॐ
चः० यत ॥ श्रीशिव० नमः ॥ गन्धंस०मि ॥ १ ॥ ॐ
तस्मादश्वा० वयः । श्रीशिव०नमः ॥ पुष्पंस० मि ॥
२ ॥ बिल्वपत्रंतुलसीदलंचार्पयेत् ॥ ॐ ॐयत्पुरुषं०
च्येते ॥ श्रीशिव०नमः ॥ धूपंस०मि ॥ ३ ॥ ॐब्राह्म
णोस्य०यत ॥ श्रीशिव०नमः ॥ दीपंस०मि ॥ ४ ॥
ॐचंद्रमा०यत ॥ श्रीशिव०नमः ॥ यथांशतोनैवेद्यंस०
मि ॥ ५ ॥ श्रीशिव०नमः॥ आचमनीयंस०मि ॥ एवं
संपूज्य ॥ ॐ अस्यश्रीशिवपंचाक्षरमंत्रस्यवामदेवऋ
षिः ॥ अनुष्टुप्छंदः ॥ श्रीसदाशिवोदेवता ॥ जपेवि
नियोगः॥यथाशक्तिपञ्चाक्षरंजपेत्॥ॐअनेनश्रीपरमेश्व
रः प्रीयतां॥प०॥मन्त्रहीनंक्रियाहीनंभक्तिहीनंसुरेश्वर!
॥ यत्पूजितंमयादेव! परिपूर्णंतदस्तुमे ॥ १ ॥ आवाह

टी. १. स्नान धूप अने दीपना वखतमां घंटा
नाद करवो पछी नवरावचा ॐ

२. बिल्वपत्र अने तुलसी अर्पण करवां

३. एरीते पूजी "ॐनमःशिवाय"। एरीतनो यथा शक्ति पं
चाक्षर मंत्र जपवो.

नंनजानामिनजानामितवार्चनम् ॥ पूजांचैवनजानामि
क्षम्यतांपरमेश्वर ! ॥ २ अन्यथाशरणंनास्तित्वमेवश
रणंमम ॥ तस्मात्कारुण्यभावेनक्षमस्वपरमेश्वर ! ॥३॥
भूमौस्खलितपादानांभूमिरेवावलम्बनम्॥त्वयिजाताऽ
पराधानांत्वमेवशरणंविभो ! *॥ ४ ॥ इतिपठित्वाशङ्ख
जलंदेवोपरिभ्रामयित्वास्वशरीरमभ्युक्ष्य॥५०॥ "अका
लमृत्युहरणं ब्रह्महत्याविनाशनं ॥ रोगघ्नंपुण्यदंपास्ये
सुरपादावनेजनं *॥ इतिदेवतीर्थंपात्रेणैवपीत्वाविरमेत्
॥ अथविष्ण्वादिपञ्चायतनसंक्षिप्तपूजाप्रयोगः ॥ २ ॥
तत्पूजायांविशेषः॥संकल्पे*॥श्रीविष्णुप्रीतयेनित्यविधि
रूपांश्रीशिवविनायकसूर्यशक्तिपरिवृत श्रीमहाविष्णुपू
जांकरिष्ये ॥ उपचारार्पणे ॥ * श्रीविष्णुशिवविनाय
कसूर्यशक्तिभ्योनमः ॥ मन्त्रपुष्पंसमर्पयामि॥ इत्यादि

टी. १. एरीते भणी शंखना पाणीने देवोना उपर फेरवी ते
वडे पोताना शरीनुं प्रोक्षणकरी । "अकाल०जनं" एमंत्रे देव
तीर्थने (वनरावेला पाणीने) पात्रवडेज पीने वीराम पामे.
ए रीते संक्षेप देवपूजानो प्रयोग पुरो थयो.

॥ हवे विष्णु विगेरे पचायन पूजा कहेछे ॥ २ ॥

तेनीपूजामां विशेष कहेछे ॥ संकल्पमां विशेष आरीते *

१. उपचारना अर्पणमां विशेष आरीते *

मू. १ ॥ अथ सूर्यादिपञ्चायतनपूजाप्रयोगः॥ ३ ॥

एवंसूर्यादिपञ्चायतनपूजायांसङ्कल्पे ॥ * श्रीसूर्यप्रीतयेनित्यविधिरूपां श्रीशिवविनायकविष्णुशक्तिपरिवृतश्रीसूर्यपूजांकरिष्ये ॥ उपचारार्पणेतु ॥ * श्रीसूर्यशिवविनायकविष्णुशक्तिभ्योनमः ॥ मन्त्रपुष्पंसमर्पयामि । इत्यादि ॥

२ ॥ अथ शक्त्यादिपञ्चायतनपूजाप्रयोगः ॥ ४ ॥

एवंशक्त्यादिपञ्चायतनपूजायांतु संकल्पे ॥ * ॥ श्रीशक्तिप्रीतयेनित्यविधिरूपां श्रीविष्णुशिवविनायकसूर्यपरिवृतश्रीशक्तिपूजां करिष्ये ॥ उपचारार्पणेतु * ॥ श्रीशक्तिविष्णुशिवविनायकसूर्येभ्योनमः । मन्त्र पुष्पं स०मि ॥ इत्यादि ॥

टी. १ हवे सूर्यादिपंचायतनपूजानोप्रयोग कहेछे ॥३॥

एरीते सूर्यवीगेरे पंचायतननीपूजाना संकल्पमां विशेषआरीते *

२. उपचारना अर्पणमां विशेषआरीते *

३ हवेशक्त्यादिपंचायतन पूजानो प्रयोग कहेछे ॥ ४ ॥

एरीते शक्ति, वीगेरे पंचायतननी पूजामांना संकल्पमां *

५. उपचारना अर्पणमां विशेष आरीते *

मू.॥ अथ विनायकादिपञ्चायतनपूजाप्रयोगः ॥ ५ ॥
एवंविनायकादिपञ्चायतन पूजायां सङ्कल्पे॥ ॥ श्री
विनायकप्रीतयेनित्यविधिरूपां श्रीविष्णुशिवसूर्यशक्ति
परिवृतश्रीविनायकपूजांकरिष्ये॥ उपचारार्पणेतु॥
श्रीविनायकविष्णुशिवसूर्यशक्तिभ्योनमः । मन्त्रपुष्पं
स० मि ॥ इत्यादि ॥ पूजान्तेजपमन्त्रास्तुतत्तद्देवप्रका
शकाः ॥ ते यथा ॥ ॐनमोनारायणाय ॥ इतिविष्णु
मंत्रः ॥ २ ॥ ॐह्रां ह्रीं सः । इतिसूर्यस्य ॥ ३ ॥
ॐ ऐंह्रींक्लींचामुंडायैविच्चे । इतिशक्तेः ॥ ४ ॥ ॐ व
क्रतुण्डायहुं ॥ इतिविनायकस्य ॥ ५ ॥ इतिविशेषः॥

१ हवेविनायकादिपंचायतनपूजानोप्रयोगकहेछे ॥ ५॥
टी. ए रीते विनायक वीगेरे पंचायतनना पूजामांना
संकल्पमां विशेष आरीते
२. उपचारोना अर्पणमां विशेषआरीते
३. पूजानी समाप्तिमां जपना मंत्रोतो तेते देवना प्रका
शकोछे ते आ रीते
४. ए रीते विष्णुनो मंत्र ॥ २ ॥
५. ए रीते सुर्यनो मंत्र ॥ ३ ॥
६. ए रीते शक्तिनो मंत्र ॥ ४ ॥
७. ए रीते विनायकनो मंत्र॥५॥"एरीते विशेषछे."बाकी

मू.शेषमुक्तप्रयोगवत् ॥ इति विष्ण्वादिपञ्चायतनपूजायां विशेषः ॥

॥ अथकेवलशिवपूजनेच्छुंप्रतिशिवपूजाप्रयोगः ॥

तत्रकर्ताधृतभस्मत्रिपुंड्रुरुद्राक्षः शिवायतनंगत्वाक्षालितपादः स्वाचान्तउदङ्मुखोदेशकालौसङ्कीर्त्त्य श्रीशिवप्रीत्यर्थं श्रीशिवपूजांकरिष्ये ॥ इति सङ्कल्पः * ॥ अस्यश्री शिवपञ्चाक्षरमन्त्रस्यवामदेवऋषिः॥अनुष्टुप्छन्दः ॥ श्रीसदाशिवोदेवता॥न्यासे पूजने जपेचविनियोगः ॥ वामदेवऋषयेनमः शिरसि १ । अनुष्टुपछन्दसेनमोमुखे । श्रीसदाशिदवेवतायेनमोहृदि ।उँनंतत्पुरुषायनमो हृदये ॥ १ ॥ उँमंअघोराय नमः पादयोः ॥ २ ॥ उँशिंसद्योजातायनमो गुह्ये ॥ ३ ॥ उँवांवाम

टी.—कहेला प्रयोग प्रमाणे समजवुं.

एरीते विष्णु विगेरे पंचायतननी पुजामां वीशेषछे ॥

॥ हवे एकला शिवना पुजननी इच्छावाला प्रत्ये शिव पुजानो प्रयोग कहीये छीये ॥ तेमां पुजा करवावालो भस्म त्रिपुंड्र अने रुद्राक्ष धारण करेलो तेमज पग धोएलो अने आचमन करेलो शिवना मंदिरमां जइने उत्तर सामा मुखे बेशी पत्र २० ना टीपणमां लख्या प्रमाणे देशकालनुं कीर्तन (संकल्प) करी "श्रीशिव०करिष्ये" ए रीते संकल्प करे *

मृ. देवायनमोमूर्ध्नि ॥४॥ ॐयंईशानायनमो मुखे ॥५॥ ॐउं हृदयायनमः ॥ १ ॥ ॐनंशिरसेस्वाहा ॥ २ ॥ ॐमंशिखायैवषट् ॥३॥ ॐशिंकवचायहुं॥४॥ ॐवांनेत्रत्रयायवौषट् ॥ ५ ॥ ॐयंअस्त्रायफट् ॥ ६ ॥ कुंभपूजांविधाय ध्यायेत् *॥ध्यायेन्नित्यंमहेशंरजतगिरिनिभंचारुचन्द्रावतंसंरत्नाकल्पोज्ज्वलाङ्गंपरशुमृगवराऽभीतिहस्तंप्रसन्नम्॥ पद्मासीनंसमन्तात्स्तुतममरगणैर्व्याघ्रकृत्तिंवसानं विश्वाद्यं विश्वबन्द्यं निखिलभयहरं पञ्चवक्त्रंत्रिनेत्रं ॥१॥इतिध्यात्वा प्राणप्रतिष्ठांकृत्वा स्थाप्यलिङ्गं स्पर्शन्नावाहनं कुर्यात् ॥ * ॥ ॐभूः पुरुषंसाम्बसदाशिवमावाहयामि ॥ ॐभुवः पुरुषंसाम्ब०यामि ॥ ॐस्वः पुरुषंसाम्ब०यामि॥ ॐभूर्भुवः स्वः पुरुषंसाम्ब० यामि ॥ ईत्यावाह्य ॥" स्वामिन्सर्वजगन्नाथ ! यावत्पूजावसानकम् ॥ तावत्त्वंप्रीतिभावेनलिङ्गेऽस्मिन्सन्निधो

टी. १, पत्र ८७ मां लख्या मुजब कुंभ पूजा करी ध्यान करवुं•

२. ए रीते ध्यान करी प्राणप्रतिष्टा * करीने पासेना लिंगने स्पर्श करतां आवाहन करवुं *·

३. एरीते आवाहन करी "स्वामिन्सर्वजगन्ना०सन्निधोभ

* कदि आ अप्येए प्राण प्रतिष्टा करवानी हायतो आगळ पार्थिव पूजामां लखीछे मां जोवी.

भव"॥इति पुष्पाञ्जलिंदद्यात्॥स्थावरलिङ्गेपूर्वसंस्कृत
चरलिङ्गेच प्राणप्रतिष्ठाद्यावाहनान्तं न कार्यम् * ॥
ॐसद्योजातंप्रपद्यामिसद्योजातायवैनमोनमः ॥ ॐनमः
शिवायश्रीसाम्बसदाशिवायनमः ॥आसनंसमर्पयामि
॥ स्त्रीशूद्रौचेत् ॥ ॐनमःशिवायेति पञ्चाक्षरीस्थाने॥
श्रीशिवायनमः ॥ इतिनमोन्तमन्त्रेणपूजयेत् ॥ * ॥ ॐ
भवेभवेनातिभवेभवस्वमां ॥ ॐनमःशि०नमः ॥ पाद्यं
स०मि ॥ ॐभवोद्भवायनमः ॥ ॐनमःशि०नमः ॥अर्घ्यं
स०मि ॥ ॐवामदेवायनमः ॥ ॐनमःशि०नमः ॥ आ
चमनीयंस०मि ॥ ॐज्येष्ठायनमः ॥ ॐनमःशि०नमः।
स्नानंस०मि ॥ ततोमूलमन्त्रेणाप्ययस्वेत्यादिभिः
पञ्चामृतैः संस्नाप्यआपोहिष्ठेतितिसृभिः शुद्धो-

टी. व" एरीतेना मंत्रे पुष्पांजलि आपवी ॥ स्थापेला
अने प्रथम संस्कार करेला चर (चलित) लिंगमां प्राणप्रतिष्ठा
थी आवाहन सुधी नकरवुं *

१. स्त्री अने शूद्र होयतो तेणे ॥ ॐनमःशिवाय ॥
पंचाक्षरी मंत्रने ठेकाणे ॥ श्रीशिवायनमः॥ ए रीते "नमः"॥
अंते आवे ते रीतना मंत्रे करी पूजा करवी *

२. ते पछी मूलमंत्रे अने आप्यायस्व इत्यादि पत्र ९१
मां लखेला मंत्रोए पंचामृतवडे नवरावी आपो हिष्ठा एरीते
पत्र ४२मांनी त्रण ऋचाये शुद्धोदके प्रक्षालनकरी आगीयार

शाल्यैकादशावृत्त्यैकावृत्त्यावारुद्रेणपुरुषसूक्तेनच चन्द
नकुङ्कुमकर्पूरवासितजलेनाभिषेकं कुर्यात् ॥ ॐनमःशि०
नमः। आचमनीयंस०मि ॥ ईत्याचमनंदत्वा ॥ साक्षतज
लेनतर्पणंकार्यं ॥ ॥ ॐभवंदेवंतर्पयामि ॥ १ ॥ ॐश
र्वंदेवंत०मि ॥ २ ॥ ॐईशानंदेवंत०मि ॥ ३ ॥ ॐपशु
पतिंदेवंत०मि ॥ ४ ॥ ॐउग्रंदेवंत०मि ॥ ५ ॥ ॐरुद्रं
देवंत०मि ॥ ६ ॥ ॐभीमंदेवंत०मि ॥ ७ ॥ ॐमहान्तंदे
वंत०मि ॥ ८ ॥ ॐभवस्यदेवस्यपत्नींत०मि ॥ १ ॥ ॐ
शर्वस्यदेवस्यपत्नींत०मि ॥ २ ॥ ॐईशानस्यदेवस्यप०
मि ॥ ३ ॥ ॐपशुपतेर्देवस्यप०मि ॥ ४ ॥ ॐउग्रस्यदेव
स्यप०मि ॥ ५ ॥ ॐरुद्रस्यदेवस्यप०मि ॥ ६ ॥ ॐभीमस्य
देवस्यप०मि ॥ ७ ॥ ॐमहतोदेवस्यप० मि ॥ ८ ॥ ॐ
श्रेष्ठायनमः ॥ ॐनमःशि०नमः ॥ वस्त्रंस०मि ॥ ॐन
मःशि०नमः। आचमनीयंस०मि ॥ ॐरुद्रायनमः ॥
। ॐनमःशि०नमः । यज्ञोपवीतंस०मि ॥ ॐनमःशि०
मः ॥ आचमनीयंस०मि ॥ ॐकालायनमः ॥ ॐ

आवर्त्तने अथवा एक आवर्त्तने रुद्र अने पुरुषसूक्ते चंदन के
सर अने कर्पूरना सुगंधवाला जलवडे अभिषेक करवो ॥ ॥

१, एरीते आचम आपी यव अथवा साल वडे मिश्रित
जले देवउपर तर्पण करवुं ते

मू. नमः शि० नमः । चन्दनंस० मि ॥ ॐकलविकर णायनमः । ॐनमःशि०नमः अक्षतान्स०मि ॥ ॐ विकरणायनमः ॥ ॐनमःशिवाय०नमः । पुष्पाणिस० मि॥सहस्रमष्टोत्तरशतंवासहस्रादिनामभिर्मूलमन्त्रेणवा बिल्वपत्राणिदद्यात् ॥ * ॥ ॐबलायनमः। ॐनमःशिवा य०नमः । धूपंस०मि ॥ ॐबलप्रमथनायनमः ॥ ॐन मःशि०नमः दीपंस०मि ॥ ॐसर्वभूतदमनायनमः । ॐनमःशि०नमः ॥ नैवेद्यंस०मि॥ॐनमःशि०नमः। आ चमनीयंस०मि ॥ ॐनमःशि०नमः । फलं स०मि ॥ ॐ मनोन्मनायनमः ॥ ॐनमःशि०नमः । तांबूलंस०मि । मूलेन वैदिकैर्मन्त्रैश्च नीराजनं * ॐईशानः सर्वविद्या नामीश्वरः सर्वभूतानांब्रह्माधिपतिर्ब्रह्मणोधि शिवो मेअस्तुसदाशिवोम्॥ॐनमःशिवाय०नमः। मन्त्र पुष्पंस०मि ॥ ॐभवायदेवायनमः ॥ १ ॥ ॐशर्वायदेवा यनमः ॥ २ ॥ ॐईशानायदेवायनमः ॥ ३ ॥ ॐपशुप तयेदेवायनमः ॥ ४ ॥ ॐउग्रायदेवायनमः ॥ ५ ॥ ॐरु

टी. १. हजार १००० अथवा १०८ बिलीपत्रोसहस्र अथवा अष्टोत्तर शतनामे अथवा मूलमन्त्रे चडाववां * २. मूलमंत्र अने पत्र १७ माना वैदिक मंत्रोये नीराजन (आरति) करवुं *

द्रायदेवायनमः ॥ ६ ॥ ॐभीमायदेवायनमः ॥ ७ ॥ ॐ
महतेदेवायनमः ॥ ८ ॥ ॐभवस्यदेवस्यपत्न्यैनमः॥१॥
ॐशर्वस्यदेवस्यपत्न्यैनमः ॥ २ ॥ ॐईशानस्यदेवस्यप
त्न्यैनमः ॥ ३ ॥ ॐपशुपतेर्देवस्यपत्न्यैनमः ॥ ४ ॥ ॐ
उग्रस्यदेवस्यपत्न्यैनमः ॥ ५ ॥ ॐरुद्रस्यदेवस्यपत्न्यै
नमः ॥ ६ ॥ ॐभीमस्यदेवस्यपत्न्यैनमः ॥७॥ ॐमहतो
देवस्यपत्न्यैनमः ॥ ८ ॥ इतिषोडशनमस्कारान्कृत्वा
द्वादशपुष्पाञ्जलीन्दद्यात् ॥ * ॥ॐशिवायनमः।१॥
ॐरुद्रायनमः । २ ॥ ॐपशुपतयेनमः ॥ ३ ॥ ॐनील
कण्ठायनमः ॥ ४ ॥ ॐमहे॰ यनमः ॥ ५ ॥ ॐहरिके
शायनमः ॥ ६ ॥ ॐविरूपाक्षायनमः ॥ ७ ॥ ॐपिना
किनेनमः ॥ ८ ॥ ॐत्रिपुरान्तकायनमः ॥९ ॥ ॐशम्भ
वेनमः ॥ १० ॥ ॐशूलिनेनमः ॥ ११ ॥ ॐमहादेवाय
नमः ॥ १२ ॥ ॐनमः शि॰नमः । प्रदक्षिणांस॰मि॥
ॐनमःशि॰नमः ॥ नमस्कारान्स॰मि ॥ ततोमूलमंत्रम
ष्टोत्तरशतंजप्त्वा "अनेनजपेनश्रीशिवःप्रीयतां"॥इति
जपंनिवेद्य ॥ प॰ ॥"मन्त्रहीनंक्रियाहीनंभक्तिहीनंसु

टी. १. एरीते सोल मनस्कार करी बार पुष्पांजलि अर्पण करवी
२. मूलमंत्र (ॐनमःशिवाय). एकसोआठवार जपीने
" अनेनज॰यतां " एरीते जप निवेदन करी " मंत्रहीनं॰

मू. रेश्वर! ॥यत्पूजितंमयादेवपरिपुर्णंतदस्तुमे * ॥ इतिक्षमापयित्वा ॥ अनेनपूजनेनश्रीसाम्बसदाशिवः प्रीयतां ॥ इतिनिवेदयेत् ॥ इतिशिवपूजाप्रयोगः ॥

॥ अथ पार्थिवपूजाविधिः ॥

अथलिङ्गलक्षणमुक्तंसूतसंहितायाम् ॥ प०॥नर्मदाजलमध्यस्थंबाणलिङ्गमितिस्थितं ॥ बाणासुरार्चितंलिङ्गंबाणलिङ्गंतदुच्यते॥तत्रापि॥त्रिपञ्चवारंयस्यैवतुलासाम्यंनजायते॥तदाबाणंसमाख्यातं शेषंपाषाणसंमितं ॥ शेषंनार्मदमुच्यते।इतिपाठान्तरं॥नद्यांवाप्रक्षिपेद्भूयोयदातदुपलभ्यते। बाणलिङ्गंतदाविद्धि सर्वलिङ्गोत्तमोत्तमम्

टी. स्तुमे "एमंत्रेक्षमापन करी" अनेन पूज०यतां " एरीते पूजा निवेदन करवी॥ए रीते शिव पूजानो प्रयोग पुरो थयो॥

॥ हवे पार्थिवपूजानो विधि केहेछे ॥

हवे लिंगनुलक्षण सूतसंहितामां कहेलुछे, के नर्मादाना जलनी मध्यमां रहेलुबाण लिंग केहेछे. अने बाणासुरे अर्चन करेलुंलिंग बाणलिंग केहेवायछे, तेहेमां पण जे बाण त्रण अथवा पांचवार तोलतां तेना तोलनी समता नथाय ते बाणलिंग, अने बाकी पाषाण केहेवाय एम केटलाक केहेछे, ने केटला नर्मादाजलनुं बाण लिंगथाय एमपण केहेछे, अथवा जेने वारंवार नदीमां ज्यारे नाखे ने तेनुते प्राप्त थाय त्यारे

*॥इतिवाक्यात्तादृशबाणलिङ्गस्यदुष्प्राप्यत्वात् ॥ प०॥
कृतेमणिमयंलिङ्गं त्रेतायांहेमसंभवं । द्वापरे पारदंश्रेष्ठं
पार्थिवंतुकलौयुगे ॥ सर्ववर्णाश्रमाणांतुकलौपार्थिवमेव
हि * ॥इतिलिङ्गात्कलौपार्थिवपूजाश्रेष्ठातस्मात्सोच्यते॥

॥ पूजाप्रयोगः ॥

अथ सद्योजातादिपञ्चब्रह्ममन्त्रैर्बौधायनोक्तप्रकारेण
पार्थिवपूजाप्रयोगः ॥ तत्रादौकृताऽऽवश्यकक्रियःस्ना

ते सर्वलिंगोमांश्रेष्ठमां श्रेष्ठ बाण लिंग समजवुं. एवाक्य थ
की ते बाण लिंगनुं दुःप्राप्य पणुंछे माटे सत्ययुगमां मणिथी
बनावेलुं, त्रेतायुगमां सोनाथी बनावेलुं, द्वापरयुगमां पाराथी
बनावेलुं अने कलियुगमां पार्थिव (माटीनुं) लिंग श्रेष्ठ सम
जवुं. माटे सर्व वर्ण (ब्राह्मण, क्षत्रिय, वैश्य, अने शूद्र) अने
सर्व आश्रमो (ब्रह्मचारी, ग्रहस्थ, वानप्रस्थ, अने संन्यस्त)
ने तो कलियुगमां पार्थिव लिंगनुं श्रेष्ठपणुंछे एम लिंगपुराण
मां वाक्यछे माटे कलियुगमां पार्थिव पूजा श्रेष्ठछे माटे ते क
हीये छीये.

॥ हवेपूजानो प्रयोग कहेछे ॥

हवे सद्योजातादि पांच ब्रह्म (वेद) मंत्रो वडे बौधायने
कहेली पार्थिव पूजानो प्रयोग कहीये छीये.
तेमां पेहेलां अवश्यक क्रिया करेलो अने स्नांन विगेरेथी

नादिनाशुचिर्भूत्वाधृतात्रिपुण्ड्ररुद्राक्षमालःकृतसन्ध्याव
न्दनादिनित्यक्रियःप्रयतोब्रह्मचारी
शंगत्वाशुचौदेशेपाषाणकीटकेशास्थिवालुकादिदोषर
हितांमृदंदृष्ट्वातत्र॥भूम्यैनमः॥सकलपूजार्थेगन्धाक्षतपु
ष्पाणि समर्पयामि॥इतिभूमिंसंपूज्य॥भूम्यैनमः।
नत्वाईशानकोणगतांमृदंशस्त्रेणोत्कीर्याष्टांङ्गुलांमृदमपा
कृष्य॥प०॥उद्धतासिवराहेणकृष्णेनशतबाहुना।
त्वांच गृह्णामिप्रजयाचधनेनच॥इतिमन्त्रेणशुद्धान्तर्मृद
मादायशूद्रादिस्पर्शरहितोमौनीगृहमागत्यशुचि स्थले
तांस्थापयेत् ॥ कृताचमनोचैलाजिनकुशोत्तरेह्यासनेउद

पवित्रथइ. भस्मत्रिपुंड्र अने रुद्राक्षनु धारण करी तेमज
वंदनादि नित्यक्रिया करी इंद्रीयो नियम राखी ब्रह्मचारीव्रत रा
खी अने श्वेत वस्त्र पेहेरी उत्तर दिशा तरफ जइ पवित्र ज
ग्योमां पथर, जीवात, वाळ, हाडकां, अने रेती विगेरेथी दोष
रहित माटी जोइने ते जग्योये " भूम्यैनमः । सकल०गंधा०
मि" ए मंत्रे भूमिनुं पूजनकरी ' भूम्यैनमः ' एमंत्रे पृथ्वीने न
मी ईशान खुणामांना भागनी माटी शस्त्र (कोशाविगेरे) वडे
खोदी आठ आगल उंडाइसुधीनी माटीने काहाडी नाखी
" उद्धृता०धनेनच " ॥एमंत्रे शुद्ध अंदरनी माटी लेइ रस्ता
मां शूद्र वीगेरेनो स्पर्श न थाय तेम वगरबोले घेर आवी प
वित्रजग्योमां ते माटीने मुकवी. पछी आचमन करी प्रथम दर्भो

मू. ङ्मुखउपविशेत्॥ततः॥“पृथ्विव्वयाधृतालोकादेवि! त्वं
विष्णुनाधृता॥त्वंचधारयमांदेवि! पवित्रींकुरुचासनं”॥इ
तिभूमिंसंप्राथ्र्य। अपसर्पन्तुयेभूतायेभूताभुविसंस्थिताः
॥येभूताविघ्नकर्त्तारस्तेनश्यन्तुशिवाज्ञया ॥ इतिपठित्वा
गौरसर्षपान्चतुर्दिक्षुविकिरेत् ॥ देकालौसङ्कीर्त्य ॥ श्री
शिवप्रीतयेपार्थिवलिङ्गपूजनं करिष्ये ॥ इतिसङ्क
ल्प्य ॥ ॐसद्योजातंप्रपद्यामिसद्यो जातायवैनमो नमः
॥ भवेभवेनातिभवेभवस्वमां भवोद्भवायनमः ॥ इति
मन्त्रेणमृदश्चूर्णं कुर्यात् ॥ ‘ॐवामदेवायनमो ज्येष्ठाय
नमः श्रेष्ठायनमो रुद्रायनमः कालायनमः कलविकर
णायनमोबलविकरणायनमो बलायनमो बलप्रमथनाय
नमः सर्वभूतदमनाय नमोमनो न्मनायनमः’॥ इतिजल

टो. पाथरी ते उपर अजिन (मृगचर्म) अने ते उपर वस्त्र ए रीतना आसन उपर उत्तर दिशा सामु बेसवुं. ॥ पछी “पृथ्विव्वया०चासनं” ए मंत्रे भूमिनी प्रार्थना करी “अपसर्पन्तु०शिवाज्ञया” ए मंत्र भणी धोळा सर्षव चारेदिशामां वेरवा. ॥ ते पछी पत्र ८५वा२० ना टीप्पणमां लख्या मुजब देशकालनुं कीर्त्तन (संकल्प) करी “श्रीशिवप्री०करिष्ये” ए रीते संकल्पकरी “ॐसद्योजातं०यनमः” एमंत्रेमाटीनुं चुरण (भूको)करवो “ॐ वामदेवाय०न्मनायनमः” ए मंत्रे

सेचनं ॥'अघोरेभ्योथघोरेभ्यो घोरघोर तरेभ्यः । सर्वे भ्यः सर्व शर्वेभ्यो नमस्ते अस्तुरुद्ररूपेभ्यः'॥ इतिसं योजनम् ॥ ॐतत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नोरुद्रःप्रचोदयात्'॥इतिपिण्डीकरणम्॥ॐईशानःस र्वविद्यानामीश्वरः सर्वभूतानांब्रह्माधिपतिर्ब्रह्मणोधिप तिर्ब्रह्माशिवोमेअस्तुसदाशिवोम् ॥ इतिमन्त्रेणयथो क्तमेखलमखण्डंलिङ्गंविधाय ।'सद्यःसमस्ताघनाशन' !।इतिशिरसाभिनम्यपूतेवामपाणौवेदिकायांताम्रपात्रे वाबिल्वपत्रंनिधायतदुपरिसाक्षतपुष्पंलिङ्गं संस्थाप्य प्राण प्रतिष्ठां कुर्यात् *॥ अथप्राणप्रतिष्ठा ॥अस्यप्रा

टी. तेमां जल रेडवुं. "ॐअघोरेभ्यो०रूपेभ्यः"ए मंत्रे जल अने माटी एकठुं करवुं. "ॐतत्पुरुषाय० प्रचोदयात्" ए मंत्रे तेनो पीडो करवो. "ॐईशानः०शिवोम्" ए मंत्रे कह्या मूजवनी मेखला (जलाधारी) नु अखंडित लिंगबनावीने. "ॐसद्यः०नाशन" ए मंत्रे मुस्तकवडे तेने नमस्कार करी पवित्र डावा हाथमां अथवा वेदिका (चोखंडुंस्थंडिल) उपर अथवा त्रावाना पात्रमां बिल्वपत्र मुकी ते उपर अक्षत (यव ने तेना अभावे चोखा) अने पुष्प सहित लिंगनु स्थापन करी तेज प्रमाणे जमणा हाथनी अनामिका (त्रीजी आंगली) नो स्पर्श करी प्राण प्रतिष्ठा करवी ते नीचे मुजब.*

सू. णप्रतिष्ठामन्त्रस्यब्रह्मविष्णुरुद्राऋषयः ऋग्यजुःसामानिच्छन्दांसि।प्राणाख्या देवता ॥ आंबीजं॥ह्रींशक्तिः । क्रौंकीलकं । पार्थिवलिङ्गप्राणप्रतिष्ठापनेविनियोगः॥ ॐआंह्रींक्रोंयंरंलंवंशंपंसंहंसः।शिवस्यप्राणाः॥ जीवः । शिवस्यसर्वेन्द्रियाणि इहागत्यसुखंचिरंतिष्ठन्तुस्वाहा।शिवेहागच्छेहतिष्ठ । इति[1]प्राणप्रतिष्ठांकृत्वासहपुष्पोदकेनलिङ्गेदेवमावाहयेत् ॥ ॐभूःपुरुषमावाहयाम्योंभुवःपुरुषमावाहयाम्यों सुवःपुरुषमावाहयम्योंभूर्भुवःसुवःपुरुषमावाहयाम्यायातुभगवान्महादेवइत्यावाहयेत् ॥प०॥स्वामिन्सर्वजगन्नाथयावत्पूजावसानकम् तावत्त्वंप्रीतिभोवनलिङ्गेस्मिन्सन्निधोभव॥इतिसंप्रार्थ्य। स्वस्यवामभागेजलपूर्णकलशंस्थापयेत् ॥ सर्वोपचारान्दक्षिणभागेच ॥ ॐआपोवाइद७ सर्वंविश्वाभूतान्यापःप्राणावाआपः पशवआपोन्नमापोमृतमापः सम्राडापोविराडापश्छंदा ७स्यापोज्योती ७ ष्यापोयजू

टी. १. ए रीते प्राण प्रतिष्ठाकरी पुष्पसहित जलवडे लिंगमां देवनुं " ॐभूःपुरुष०महादेवः " ए मंत्रे आवाहनकरी " स्वामिन्सर्व०भव " ए मंत्रे तेनी प्रार्थनाकरी पोताना डाबा भागमां जलेभरेलो कलश अने जमणी तरफ सर्व पूजासामग्री मुकीने. " ॐआपोवा०ओम् " ए मंत्रे जलकलशनुं अभि

ष्याप:सर्वादेवताआपोभूर्भुव:सुवरायओम् ॥ इत्य
भिमन्त्र्यगन्धाक्षतैःसंपूज्य।कलशस्यमुखेविष्णु:कण्ठेरु
द्र:समाश्रितः।मूलेतत्रास्थितोब्रह्मामध्येमातृगणा:स्मृ
ता:॥कुक्षौतुसागरा:सप्तसप्तद्वीपावसुन्धरा॥ऋग्वेदोऽ
थयजुर्वेद:सामवेदोह्यथर्वण: ॥ अङ्गैस्तुसहिता:
शंतुसमाश्रिता:॥आयान्तुशिवपूजार्थंदुरितक्षयकारका:
॥ इतिकलशेसर्वतीर्थान्यावाह्य ॥ ततस्तदुद्‌तैर्जलै:। ॐत
त्पुरुषायविद्महेमहादेवायधीमहि। तन्नोरुद्र:प्रचोदयात्
॥ इतिरुद्रगायत्र्या।स्वशरीरंपुजासंभारांश्चसंप्रोक्ष्यध्याये
त् ॥ ❀ ध्यायेन्नित्यंमहेशंरजतगिरिनिभंचारुचन्द्रावतंसंर
त्नाकल्पोज्वलाङ्गंपरशुमृगवराऽभीतिहस्तंप्रसन्नम् ॥
पद्मासीनंसमंतात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानांवि
श्वंविश्ववन्द्यंनिखिलभयहरंपंचवक्त्रंत्रिनेत्रम्॥१।
त्सङ्गनिषण्णकुञ्जरमुखं प्रेम्णा करेणस्पृशन्वामोरु
स्थितवल्लभाङ्कललित:स्कन्दंकरेणस्पृशन्।इष्टाभीतिम
नोहरंकरयुगंबिभ्रत्प्रसन्नाननोभूयान्न:शरदिन्दु

टी. मंत्रणंकरी गंधाक्षत वडे पूजनकरी "कलशस्य०कारका:" ए मंत्रोए कलशमां तीर्थोनु आवाहन करी पछी ते कलशमा ना जलवडे "ॐतत्पुरुषाय०प्रचोदयात्" ए रुद्रगायत्रीवडे पोताना शरीरनुं अने पूजासाहीत्यनुं प्रोक्षणकरी ध्यान करवुं.❀

नुःश्रेयस्करःशङ्करः॥२॥ एवमात्मानंरुद्ररूपंध्यात्वा। ॐनमःशिवायश्रीमहादेवायमानसिकंचन्दनंकल्पयामि॥१॥ ॐनमःशि०य मानसिकंपुष्पंकल्पयामि ॥ २ ॥ ॐनमःशि०य मानसिकंधूपंकल्पयामि ॥ ३ ॥ ॐनमःशि०य मानसिकंदीपंकल्पयामि ॥ ४ ॥ ॐनमःशि०य मानसिकंनैवेद्यंकल्पयामि ॥ ५ ॥ इत्यभ्यर्च्य। वामनासापुटाऽध्वनामनश्चिन्तितंशिवंपुष्पप्रक्षेपेणलिङ्गेआगतंविभाव्यपूजयेत्॥ * ॐसद्योजातंप्रपद्यामिसद्योजातायवैनमोनमः। ॐनमः शिवाय श्रीसाम्बसदाशिवायनमः। आसनंसमर्पयामि॥ इतिपुष्पाद्यासनंदेयं *॥ ॐयोरुद्रोअग्नौयोअप्सुयओषधीषुयोरुद्रोविश्वाभुवनाविवेशतस्मैरुद्रायनमोअस्तु ॥ इतियजुषापाद्यपात्रमभि

टी.१. ए प्रमाणे रुद्ररूप आत्मानुं ध्यान करी. " ॐनमः शिवाय श्री०चंदनं कल्पयामि ॥ १ ॥ ए रीते मानसिक पुष्प २ धूप ३ दीप ४ अने नैवेद्य वडे अर्चन करी. डाबी तरफना नाकना पुट (छिद्र) ना मारग वडे मने चिंतवेला शिवने पुष्पना प्रक्षेपवडे लिंगमां आव्याएम भावना करी पूजन करवुं. *

२. ए मंत्रे पुष्प विगेरेनुं आसन अर्पण करवुं. *

३. ए रीतनी यजुषा (छंद वगरनीऋचा) वडे पाद्यपात्रनुं

मन्त्र्यप्रक्षाल्यतिरःपवित्रमपआनीयपुनस्तेनैवापोभि
न्त्र्यसहपवित्रेणादित्यंदर्शयित्वार्पयेत्*। ॐभुवेभेवेनाति
भवेभवस्वमां ॥ ॐनमःशि०मः । पाद्यंसमर्पयामि ॥ पु
नः ॥ योरुद्रो०स्तु ॥ इतियजुषाऽर्घ्यपात्रमभिमन्त्र्य
प्रक्षाल्यतिरः पवित्रमपआनीयपुनस्तेनैवापोभिमन्त्र्य
सहपवित्रेणादित्यंदर्शयित्वार्पयेत्*॥ ॐभवोद्भवायनमः।
ॐनमःशि०मः॥ अर्घ्यंसमर्पयामि॥ पुनस्तथैवाचमनपा
त्रमादित्यंदर्शयित्वार्पयेत् *॥ ॐवामदेवायनमः॥ॐनमः
शि०मः। आचमनंस०मि ॥ ॐज्येष्ठायनमः । ॐनमः
शि०मः । मधुपर्कंस० ॥ ततःपञ्चामृतस्नानं ॥ ततः।
ॐआपोहिष्ठा०से ॥ १ ॥ योवःशि०रः ॥ २ ॥ तस्मा

अभिमंत्रण करी ते पात्रनुं प्रक्षालन करी आडा एटले पूर्वमां अग्ररहे तेम पवित्रां (दर्भनो मध्य भाग वर्जित पडखाना दर्भना दस आंगळना बे कटका) उपरमुकी तेमां जळरेडी फरीते (ॐयोरुद्रो०अस्तु) ए मंत्रे जळनुं अभिमंत्रण करी पवित्राये सहित पाद्यपात्र सूर्यने बतावी ते पाद्य अर्पण करवुं. *

१. उपरना पाद्यपात्र मुजव अर्घ्य तैयार करी अर्पण करवुं.*

२. फरी पाद्य मुजवज आचमनीय पात्र तैयार करी आचमन अर्पण करवुं. *

३. ते पछी पत्र ९१ मां लख्या मुजब पंचामृत वडे स्नान

अं ० नः ।इतितिसृभिः ✱।उंनमःशि ० मः ॥ शुद्धोदक स्नानंस० ॥ उँनमः०मः आचमनीयंस०मि ॥ तंतः साङ्गेनशतरुद्रीयेणाभिषेकंकुर्यात् ॥ ततः ॥ उंभूर्भुवः स्वः ॥ इतिव्याहृतिभिःप्रदक्षिणमुदकंपरिषिच्यपवित्रंपादमूले निधायाद्भिस्तर्पयेत् ✱॥ उँभवंदेवंतपर्यामि ॥ १ ॥ उँशर्वंदेवंत० ॥ २ ॥ उँईशानंदेवंत ० ॥ ३ ॥ उंपशुपतिंदेवंत०॥ ४ ॥ उँरुद्रंदेवंत० ॥ उँउग्रंदेवंत० ॥ ६ ॥ उँभीमंदेवंत० ॥ ७ ॥ उँमहान्तंदेवंत० ॥८॥ इत्यष्टभिर्मन्त्रैस्तर्पणंकुर्यात् ✱॥उँश्रेष्ठायनमः ॥ उँनमःशि०मः वस्त्रंस० ॥ वस्त्राचमनंस० ॥ उँरुद्रायनमः ॥ उँनमःशि ०मः ॥ उपवीतंस० । तंतः॥भवायदेवायनमः इत्याद्यष्टाभिरष्टौपुष्पाणिदद्यात् ✱ ॥ उँभवायदेवायन

टी. करावी. तेपछी पत्र४४मुजब "आपोहिष्ठा०नः ।३। एत्रण ऋचावडे नवरावबा.✱

१. ते पछी सांग रुद्रीवडे अभिषेक करवो पछी " ॐ भूर्भुवः स्वः " एव्याहृतियोवडे प्रदक्षिणावर्त्तन शिवनी फरतुं जलनुं सेचन करी पवित्रां पादना मूलमां मुकी जलवडे तर्पणकरवुं.

२. एरीते आठमंत्रोवडे दरमंत्रे तर्पण करवुं. ✱

३ ते पछी " भवाय देवाय नमः " इत्यादि आठ शिवना नामो वडे आठ पुष्पो चडाववां.✱

मः ॥ १ ॥ ॐशर्वायदे०मः ॥ २ ॥ ॐईशानायदे०मः ॥३॥ ॐपशुपतयेदे०मः ॥४॥ ॐरुद्रायदे०मः ॥५॥ ॐउग्रायदे० ॥६॥ ॐभीमायदे० ॥७॥ॐमहतेदे०॥८॥ ॐकालायनमः॥ॐनमःशि०मः ॥ गन्धंस० ॥ ॐकलविकरणायनमः ॥ ॐनमःशि०मः ॥ अक्षतान्स० ॥ ॐबलविकरणायनमः ॥ ॐनमःशि०मः बिल्वपत्र प्पाणिचस० । ॐबलायनमः । :ॐनमःशि०मः ॥ धूपंस० । ॐबलप्रमथनायनमः । ॐनमःशि०मः ॥ दीपंस० ॥ ॐसर्वभूतदमनायनमः ॥ ॐनमःशि०मः ॥ नैवेद्यंस० ॥ ॐमनोन्मनायनमः ॥ ॐनमःशि०नः ॥ आचमनंस० ॥ ॐशंभवेनमः॥ ॐनमःशि०मः॥ ताम्बूलंस० ॥ॐशभवेनमः॥ शि०मः ॥ प्रदक्षिणांस० ॥ ॐशंभवेनमः ॥ ॐनमःशि०मः ॥ नीराजनंस०॥ शंभवेनमः । ॐनमःशि०मः ॥ नमस्कारान्स०॥ ततोलिङ्गस्यप्रागादिदिक्षुअप्रादक्षिण्येनवक्ष्यमाणमन्त्रैरक्षतान् क्षिपेत् ॥ ॐभवायक्षितिमूर्तयेनमः ॥ १ ॥ ॐशर्वायजलमूर्त्तयेनमः ॥ २ ॥ ॐईशानायअग्निमूर्त्तयेनमः ॥ ३ ॥ ॐप

टी. १ ते पछी लिंगनी फरतां पूर्वथी माडी अग्नि कोण । सुधी आठ दिशामां अप्रदाक्षिणा वर्त्तन (अवला) आगलना मंत्रोवडे अक्षत (यव) छांटवा.

शुपतयेवायुमूर्त्तयेनमः ॥४॥ ॐरुद्रायआकाशमूर्त्तयेनमः
॥ ५ ॥ ॐउग्रायययजमानमूर्त्तयेनमः ॥५॥ ॐभीमायसो
ममूर्त्तयेनमः ॥ ७ ॥ ॐमहतेसूर्यमूर्त्तयेनमः ॥ ८ ॥ ततः[1]
प्रार्थना ॥प०ॐनमोङ्कारस्वरूपायवेदरूपायतेनमः॥अ
लिङ्गालिङ्गरूपायविश्वरूपायतेनमः ॥ १ ॥ मोक्षदात्रे
नमस्तुभ्यंनमोनादात्मने तथा॥ नमःशब्दस्वरूपाय रू
पातीतायतेनमः ॥ २ ॥ त्वंमातासर्वलोकानांत्वमेवजग
तःपिता ॥ त्वंभ्रातात्वंसुहृन्मित्रंत्वंप्रियःप्रियरूपधृक् ॥
॥ ३ ॥ त्वंगुरुस्त्वंगतिःसाक्षीत्वंपितात्वंपितामहः ॥
नमस्तेभगवन्रुद्र!भास्करामिततेजसे ॥ ४ ॥ संसारसा
गरेमग्नमामुद्धरशिवाव्यय!॥अनेनपूजनेनत्वंवाञ्छिता
र्थप्रदोभव॥५॥दण्डवत्प्रणतोभूत्वास्तुत्वाचैवविशेषतः
एकाग्रप्रयतोभूत्वामन्त्रमेतदुदीरयेत् ॥ ६ ॥ अङ्गहीनं
क्रियाहीनंविधिहीनंमहेश्वर!॥ पूजितोसिमयादेव!तत्क्ष
मस्वाम्बिकापते! ॥७॥ अन्यथासकचित्तेनक्रियाहीनेन
वाविभो!॥मनोवाक्कायदुष्टेनपूजितोसित्रिलोचन!॥त
त्सर्वंक्षम्यतांदेवदासेकृत्वादयांमयि ॥८॥ * इतिप्रार्थ[2]
नांकृत्वा रौद्रैर्ऋग्यजुःसामाथर्वभिश्चार्षेयस्तोत्रैस्तुत्वा

टी.१ ते पछी प्रार्थना करवी ते नीचे प्रमाणे. *'
२. ए रीते प्रार्थना करी रुद्र संबंधी. ऋक्. यजु. साम, अने

यथाशक्तिपञ्चाक्षरमन्त्रस्यजपंकुर्यात् ॥* २
क्षरमन्त्रस्यवामदेवऋषिः ॥ अनुष्टुपूछन्दः ॥
देवता ॥ सदाशिवप्रीत्यर्थेजपेविनियोगः ॥ यथाशक्तिज
प्त्वा ॥ अनेनजपेनशिवःप्रीयतां ॥ ततः ॥ प्रयातुभ
न्महादेवः॥इतिविसर्जनंकृत्वा॥
चोमापते!प्रभो! ॥ क्षमस्वदेवदेवेश!मामङ्गीकुरुशङ्कर!॥
इतिमन्त्रमुक्त्वा पूजांसमर्पयेत्*।
यत्कृतंतुमयाशिव!॥ तत्सर्वंपरमेशान ! मयातु
तं ॥ इतिसमर्प्य ॥ ततः ॥ अयंमेहस्तोभगवानयंमे
वत्तरः ॥ अयमेविश्वभेषजोयंशिवाभिमर्शनः ।इतिमन्त्रं
पठित्वासव्यहस्ततलेनलिङ्गंस्पृशेत् ॥ ततः शिवनिर्णे
जनोदकंचुलकमितंवारत्रयंपिबेत्॥तत्रमन्त्रः*॥

टी. अथर्व वेदना मंत्रो तेमज ऋषिप्रणीत स्तोत्रोवडे
करी यथा शक्ति शिवपंचाक्षर मंत्रनो जप करवो. *

१. यथाशक्ति शिवपंचाक्षरजपी "अनेनज०प्रीयतां" एम
जपनिवेदनकरी ते पछी "प्रयातु०देवः" ए मंत्रे विसर्जनकरी
'आवाहनं०शंकर' ए मंत्रभणी पूजा अर्पण करवी तेनो मंत्र*
२. ए रीते अर्पण करी पछी "अयंमे०मर्शनः" ए मंत्र भणी
डावाहाथनी हथेली वडे लिंगनो स्पर्श करवो. ते पछी शिवने
नवरावेलुं नमण चागलां प्रमाणनुं त्रणवार पीवुं तेनो मंत्र.*

मृ. मृत्युहरं पुण्यं ब्रह्महत्याविनाशनम् ॥ व्याधिघ्नं पुण्यदंपास्ये शिवनिर्णेजनोदकं ॥ इतिबौद्धायनोक्तप्रकारेण लिङ्गार्चनचन्द्रिकानुसारी पार्थिवलिङ्गपूजाप्रयोगः अथ स्त्रीणांतुपार्थिवं लिङ्गं सभर्तॄणां विशेषतः॥ इतिविश्वेश्वरसंहितायामुक्तत्वात् ॥ सर्ववर्णाश्रमाणां तुकलौ पार्थिवमेहवहि ॥ इति पूर्वोक्तवाक्याच्च स्त्रीशूद्राणामपि पार्थिवपूजा श्रेष्ठातस्मात्सोच्यते ॥

॥ अथ स्त्रीशूद्रयोर्नाममन्त्रेण पूजाप्रयोगः ॥

॥ उदङ्मुखवउपविश्य ॥ शिवायनमः ॥ इतिमन्त्रे

टी. एरीते बोद्धायने कहेलाप्रकारे लिंगार्चनचंद्रिकाने अनुसरती पार्थिव लिंगपूजा पुरीथइ.

हवे सभर्तृ (पतिवाली) स्त्रीयोने विशेषे करी पार्थिव लिंगनु पूजन करवुं एम विश्वेश्वर संहितामां कहेलुंछे तेथी तथा सर्व वर्णो (ब्राह्मण. क्षत्रिय, वैश्य. अने शूद्र) ने तथा सर्व आश्रमो (ब्रह्मचर्य गृहस्थाश्रम. वानप्रस्थ अनेसंन्यस्त) ने तोकलियुगमां पार्थिव लिंगनुं पूजन श्रेष्ठछे एवा वाक्यथी स्त्री अने शूद्र ने पार्थिव पूजा श्रेष्ठ जणायछे माटे ते कहिये छीये.

॥ हवे स्त्री तथा शूद्रोने नाममंत्रे पूजा करवी ते उत्तर दिशा सामा मुखे बेशी " शिवायनमः " ए मंत्रे

णश्रोत्रियागारपचनाग्निसंभूतभस्मत्रिपुण्ड्रंतूष्णींरुद्रा
क्षधारणंचकृत्वाऽऽचम्यदेशकालौसङ्कीर्त्य ॥ श्रीपरमे
श्वरप्रीत्यर्थंपार्थिवलिङ्गपूजनमहं करिष्ये ॥ "हरायन
मः" ॥ इतिमृदमाहृत्य संशोध्य जलप्रक्षेपेण संपीड्य
"महेश्वरायनमः" ॥ इतिलिङ्गंकुर्यात् ॥ "शम्भवेनमः ॥
शिव! इहप्रतिष्ठितोभव" ॥ इतिसाबिल्वपत्रेताम्रपात्रेप्र
तिष्ठाप्य ॥ देवस्यप्राणाः ॥ जीवः ॥ सर्वेन्द्रीयाणिइहा
गत्यसुखंचिरंतिष्ठन्तु ॥ ध्यायेन्नित्यंमहेशंरजतगिरिनिभं
चारुचन्द्रावतंसंरत्नाकल्पोज्वलाङ्गंपरशुमृगवराभीति
हस्तंप्रसन्नम् ॥ पद्मासीनंसमन्तात्स्तुतममरगणैर्व्याघ्र
कृत्तिंवसानंविश्वाद्यंविश्ववन्द्यंनिखिलभयहरंपञ्चवक्त्रं

श्रोत्रीय (सांगवेदभणनार) ना घरना पाकना अग्निना भस्मनु त्रिपुंड्र तथा वगर मंत्रे रुद्राक्षनु धारण करी पत्र २० ना टीप्पणमां लख्या मुजब देशकालनु कीर्त्तन (संकल्प) करी ' श्रीपरमेश्वर० करिष्ये ' एमसंकल्प करी ' हरायनमः ' एमंत्रे प्रथमबताव्या मुजवनी शुद्ध माटी लावी ते साफ करी जल नाखी तेनो पींडो करी ' महेश्वरायनमः ' एमंत्रे लिंग बनाववु ने ' शंभवेनमः॥ शिवइह० भव ' एमंत्रे बिलीपत्र सहीत त्रांबाना पात्रमां बेसारी ' देवस्य० तिष्ठतुं ' एरीते प्राण प्रतिष्ठा करी नीचेना श्लोके ध्यान करवुं.

त्रिनेत्रं॥१॥ इतिध्यात्वा॥ शूलपाणयेनमः॥ श्रीसाम्बस
दाशिव! इहागच्छइहप्रतिष्ठइत्यावाहयेत् *॥शिवायनमः
॥ आसनंसमर्पयामि ॥ इतिपुष्पाद्यासनंदेयं * ॥ पि
नाकधृषेनमः ॥ पाद्यं स०। शिवायनमः ॥ अर्घ्यंस०
शिवायनमः ॥ आचमनं स० ॥ शिवायनमः ॥ स्नानं
स० ॥ शिवायनमः ॥ आचमनंस० ॥ शिवायनमः ॥
वस्त्रंस० ॥ शिवायनमः ॥ आचमनंस० ॥ शिवायनमः
॥ यज्ञोपवीतंस०॥ शिवायनमः ॥ गन्धंस० ॥ शिवाय
नमः ॥ पुष्पं । बिल्वपत्रंस०॥ शिवायनमः ॥ धूपंस०
शिवायनमः ॥ दीपंस० ॥ शिवायनमः ॥ नैवेद्यंस०॥
शिवायनमः॥ आचमनंस०॥ ततोलिङ्गस्यप्रागादिदिक्षु
अप्रादक्षिण्येनवक्ष्यमाणमन्त्रैरक्षतान्क्षिपेत्*॥भवाय
क्षितिमूर्त्तयेनमः ॥ १ ॥ शर्वायजलमूर्त्तयेनमः ॥ २ ॥
ईशानायअग्निमूर्त्तयेनमः ॥ ३ ॥ पशुपतयेवायुमूर्त्तये

टी. १. एरीते ध्यान करी 'शूलपाणयेनमः० । शि०प्रतिष्ठ' एं रीते आवाहन करवुं.*

२. पुष्प वीगेरेनुं आसन अर्पण करवुं.*

३. ते पछी लिंगनी फरता अप्रदक्षिणा वर्त्तन (अवला) पूर्वथी माडी अग्नि कोणा सुधीनी आठेदिशामां आगलना मंत्रो वडे अक्षत (यव अथवा चोखा) नाखवा.*

नमः ॥ ४ ॥ रुद्रायआकाशमूर्त्तयेनमः ॥ ५ ॥ उग्रा
ययजमानमूर्त्तयेनमः ॥ ६ ॥ भीमायसोममूर्त्तयेनमः
॥ ७ ॥ महतेसूर्यमूर्त्तयेनमः ॥ ८ ॥ ततःप्रार्थना ॥ न
मोङ्कार०मयि ॥ ९ ॥ इतिस्तुत्वा ॥ पशुपतयेनमः ॥
इतिक्षमाप्ययथाशक्ति ॥ 'शिवायनमः' ॥ इतिमूलमन्त्रं
जप्त्वा ॥ अनेनजपेनश्रीशिवःप्रीयतां ॥ इतिनिवेद्य ॥
महादेवायनमः॥इतिविसर्जयेत्॥इतिलिङ्गार्चनचन्द्रिका
यांधर्मा॰ध्यनुसारीस्त्रीशूद्रयोर्नाममन्त्रेणपूजाप्रयोगः॥
अत्रप्रसङ्गात्किञ्चिदुच्यते॥ पुत्रकामस्तुद्विशतदिनपर्य
न्तंप्रत्यहंलिङ्गद्वयंपीतमृत्तिकयाकुर्यात् ॥ पञ्चामृतेना

टी.१ते पछी प्रार्थना करी तेमज 'नमोंकार०मयि' ॥९॥ एरी
तना पत्र १२१ मां लखेला श्लोको वडे स्तुती करी "पशुप
तयेनमः" ए मंत्रे क्षमापनकरी शक्तिप्रमाणे "शिवायनमः"
ए मूळमंत्र जपी "अनेनज०यतां" ए रीते जपनिवेदनकरी
"महादेवायनमः" एमंत्रे विसर्जन करवुं.

ए रीते लिंगार्चन चंद्रिकामां धर्मसिंधुने अनुसरतो
स्त्री अने शुद्रने नाम मंत्रे पूजा करवानो प्रयोग पुरो थयो.

आ जगोये प्रसंगो पात्त थोडु कहीये छीये॥ पुत्रनी कामना
वाळो२००दीवस सुधी हमेशां पीळी माटी वडे बबे लिंगकरे
पंचामृत (दुध दहि घीइ मध अने साकर) वडे अभिषेक क

भिषेकः ॥ मल्लिकापुष्पाणिगुडोदनंनैवेद्यं ॥ ॐकांडात्कां
डात्प्ररोहंतिपरुषःपरुस्परि ॥ एवानोदूर्वेप्रतनुसहस्रे
णशतेनच ॥ इतिमन्त्रंशतमष्टाधिकंजप्त्वा ॥ याशतेनप्र
तनोषिसहस्रेणविरोहसि ॥ तस्यास्तेदेवीष्टकेविधेमह
विषावयं ॥ इति मंत्रेणाष्टोत्तरशतदूर्वाप्रतिमन्त्रंसमर्प
येदिति लिङ्गार्चनचन्द्रिकायां रुद्रयामले उक्तम् ॥ अ
पुत्रस्य पुत्रकामनायां प्रत्यहं पार्थिवलिङ्गपूजां कृत्वाऽ
भिलाषाष्टकजपंसंवत्सरंकुर्यादितिसंस्कारकौस्तुभेधर्मा
ब्धौचोक्तं ॥ तथापि यावत्कार्यसिद्धिर्भवेत्तावदनुष्ठानं ॥
प्रतिबन्धकदुरितबाहुल्यस्य क्षये कालनियमाभावात् ॥
तत्रसङ्कल्पेविशेषः ॥ देशकालौसङ्कीर्त्य ॥ ममअनेकज

टी. रवो। मल्लिका (मोघरा) नां पुष्पो गोल अने राधेला
चोखानुं नैवेद्य करवुं " ॐकांडात्कांडात्प्र०शतेनच " ए मंत्र
१०८ वार जपी " याशतेन०वयं " ए मंत्रे १०८ दूर्वा दर
मंत्रावृत्तीये चडाववी एम लिंगार्चन चंद्रिकामां रुद्रयामल
नामना ग्रंथमां कहेलुछे. ॥ मुदल पुत्र न होय ने तेने पु
त्रनी कामना होयतो तेहमेशां पार्थिव लिंगनुं पूजन करी आ
गल बताव्या मुजब अभिलाषाष्टकनो वर्ष सुधी पाठ करे
एम संस्कार कौस्तुभ तथा धर्मसिंधुमां कह्युछे. तोपण ज्याहां
सुधी कार्यनी सिद्धि थाय त्यांहासुधी अनुष्ठान करवुं. कारण
के संतति प्रतिबंधक पापोनुं घणापणुंछे तेथी तेना क्षयमां का

मू.न्मार्जितानपत्यत्वमृतापत्यत्वादिनिदानभूतबालघा
तनिक्षेपाहरणविप्ररत्नापहरणादिजन्यदुरितस्यसमूल
नाशद्वारादीर्घायुष्मद्बहुपुत्रादिसन्ततिप्राप्तिकामः श्री
भवानीशङ्करप्रीत्यर्थंपार्थिवलिङ्गपूजनमभिलाषा ऽष्टक
जपंचकरिष्ये ॥ इति सङ्कल्प्य पूर्वोक्तविधिना पार्थिव
पूजांकृत्वाऽभिलाषाष्टकंजपेदिति ॥ प्रत्यहंलिङ्गद्वयपू
जनेप्राणप्रतिष्ठापृथक् ॥ आवाहने ॥ ॐभूःपुरुषावावा
हयाम्यौंभुवः पुरुषावावाहयाम्यौंसुवःपुरुषावावाहया
म्यौंभूर्भुवःसुवःपुरुषावावाहयम्यायातांभगवन्तौमहादे
वौ ॥इत्यावाहनेशेषं ॥ शिवाभ्यांनमः॥ इत्यादिद्वि
वनान्तो हनेतिविशेषः ॥

॥ अथाऽभिलाषाऽष्टकप्रारम्भः॥

श्रीगणेशाय नमः ॥ विश्वानरउवाच ॥ प०।एकं ब्रह्मै

लना नियमनो अभावछे.॥हवे ते पूजाना संकल्पमां पत्र २०
सुजब देश कालनु कीर्त्तन (संकल्प) करी " ममअनेक ०
करीष्ये" ए रीते संकल्प करी प्रथम कहेला विधिवडे पार्थिवपूजा
करी अभिलाषाष्टकनो जप करवो. हमेशां बे लिंगना पूजनमां
प्राण प्रतिष्ठा जुदी करवी. ने आवाहनमां " ॐभूःपुरुषावा
वा० माहादेवौ " ए रीते ने बाकी " शिवाभ्यांनमः " एम
द्विवचनांत उपचारे पूजन करवु एटलो विशेषछे बाकी शरखुंछे.

मू. वाद्वितीयंसमस्तंसत्यंसत्यंनेहनानास्तिकिञ्चित्॥ए
कोरुद्रोनद्वितीयोवतस्थेतस्मादेकंत्वांप्रपद्येमहेशं ॥१॥
एकःकर्त्तात्वंहिविश्वस्यशंभोनानारूपेष्वेकरूपोप्यरूपः
॥ यद्वत्प्रत्यप्स्वर्कएकोप्यनेकस्तस्मान्नान्यंत्वांविनेशंप्र
पद्ये ॥ २ ॥ रज्जौसर्पःशुक्तिकायांचरौप्यंनैरःपूरस्त
न्मृगाख्येमरीचौ॥यद्वत्तद्वाद्विष्वगेषप्रपञ्चोयस्मिञ्ज्ञाते
तंप्रपद्येमहेशं ॥ ३ ॥ तोयेशैत्यंदाहकत्वंचवन्हौतापोभा
नौशीतभानौप्रसादः ॥ पुष्पेगन्धोदुग्धमध्येचसर्पिर्यत्त
च्छंभो!त्वंततस्त्वांप्रपद्ये॥४॥ शब्दंगृह्णास्यश्रवास्त्वंहि
जिघ्रेरघ्राणस्त्वंव्यङ्घ्रिरायासिदूरात् ॥ व्यक्षःपश्येस्त्वंर
सज्ञोप्यजिह्वःकस्त्वांसम्यग्वेत्त्यतस्त्वांप्रपद्ये॥५॥नोवे
दस्त्वामीशसाक्षाद्धिवेदनोवाविष्णुर्नोविधाताऽखिलस्य
॥नोयोगीन्द्रानेन्द्रमुख्याश्चदेवा भक्तोवेद त्वामतस्त्वांप्र
पद्ये ॥ ६ ॥ नोतेगोत्रंनापिजन्मापिनाख्यानोवारूपं
नैवशीलंनदेशः ॥ इत्थंभूतोपीश्वरस्त्वंत्रिलोक्याःसर्वा
न्कामान्पूरयेस्तद्भजेत्वां॥७॥त्वत्तःसर्वंत्वंहिसर्वंस्मरारे!
त्वंगौरीशस्त्वंचनग्नोऽतिशान्तः॥त्वंवैवृद्धस्त्वंयुवात्वंच
बालस्तात्किंयत्त्वंनास्त्यतस्त्वांनतोऽस्मि॥८॥ स्तुत्वेति
भूमौनिपपातविप्रःसदण्डवद्यावदतीवहृष्टः ॥ तावत्स

बालोखिलवृद्धवृद्धःप्रोवाचभूदेव!वरंवृणीहि॥९ ॥ तत
उत्थायहृष्टात्मामुनिर्विश्वानरःकृती॥प्रत्यब्रवीत्किमज्ञा
तंसर्वज्ञस्यतवप्रभो!॥ १०॥ सर्वान्तरात्माभगवाञ्शर्वः
सर्वप्रदोभवान् ॥ याञ्चांप्रतिनियुङ्क्तेमांकिमीशोदैन्य
कारिणीम्॥ ११ ॥ इतिश्रुत्वावचस्तस्यदेवोविश्वानर
स्यह ॥ शुचेःशुचिव्रतस्याथशुचिस्मित्वाब्रवीच्छिशुः ॥
॥ १२ ॥ बालउवाच ॥ त्वयाशुचेशुचिष्मत्यांयोभिला
षःकृतोहृदि ॥ अचिरेणैवकालेनसभविष्यत्यसंशयः
॥ १३ तवपुत्रत्वमेष्यामिशुचिष्मत्यांमहामते !॥ ख्या
तोगृहपतिर्नाम्नाशुचिःसर्वामरप्रियः ॥ १४॥ अभिला
षाष्टकंपुण्यंस्तोत्रमेतत्त्वयेरितम्॥अब्दंत्रिकालपठना
त्कामदंशिवसन्निधौ ॥ १५ ॥ एतत्स्तोत्रस्यपठनंपुत्र
पौत्रधनप्रदं॥ सर्वशान्तिकरंवापिसर्वापत्परिनाशनम्॥
॥ १६ ॥ स्वर्गापवर्गसंपत्तिकारकंनात्रसंशयः ॥ प्रात
रुत्थायसुस्नातोलिङ्गमभ्यर्च्यशाम्भवं ॥१७॥ वर्षंजप
न्निदंस्तोत्रमपुत्रःपुत्रवान्भवेत् ॥ वैशाखेकार्तिकेमाघे
विशेषांनियमैर्युतः ॥ १८ ॥ यःपठेत्स्नानसमयेलभतेस
कलंफलं ॥ कार्तिकस्यतुमासस्यप्रसादादहमव्ययः ॥
॥ १९ ॥तवपुत्रत्वमेष्यामियस्त्वन्यस्तत्पाठिष्यति ॥

अभिलाषाष्टकमिदंनदेयंयस्यकस्यचित् ॥ २० ॥ गोप
नीयंप्रयत्नेनमहावन्ध्याप्रसूतिकृत् ॥ स्त्रियावापुरुषेणा
पिनियमाल्लिङ्गसन्निधौ ॥ २१ ॥ अब्दंजप्तमिदंस्तोत्रं
पुत्रदंनात्रसंशयः ॥ इत्युक्त्वान्तर्दधेबालःसोपिविप्रोगृ
हंगतः ॥ २२ ॥ इतिश्रीस्कन्दपुराणे काशीखण्डे वि
श्वेश्वरस्तोत्रं संपूर्णं ॥

॥ अथ केवलविष्णुपूजनेच्छुं प्रतिविष्णुपूजाप्रयोगः ॥
तत्र सङ्कल्पे ✱ श्रीविष्णुप्रीतये श्रीविष्णोःपुजांक
रिष्ये ॥ कलशे तीर्थावाहनादिन्यासान्तं कृत्वा पूज
येत् ॥ ✱ ॐसहस्त्रशीर्षाः०गुलं ॥ श्रीमहाविष्णवेनमः
॥ मन्त्रपुष्पं समर्पयामि ॥ १ ॥ ॐपुरुषएवेदं०हंति ॥
श्रीम०नमआसनंस०मि ॥ २ ॥ ॐएतावानस्य०दिवि
श्रीम०नमः ॥ पाद्यंस०मि ॥ ३ ॥ ॐत्रिपादूर्द्ध०अभि ॥
श्रीम०नमः ॥ अर्घ्यंस०मि ॥ ४ ॥ ॐतस्माद्विराळ०
पुरः ॥ श्रीम०नमः ॥ आचमनीयंस०मि ॥ ५ ॥ ॐय
त्पुरुषेण०हविः ॥ श्रीम०नमः ॥ स्नानंस०मि ॥ ६ ॥

---

1 हवे एकला विष्णुपूजानो प्रयोग कहेछे. ॥

टी. १. तेमां संकल्पमां विशेष आरीते ✱

कलशमां तीर्थना आवाहनथी न्यास सुधी पत्र ८७थी ९० सु
धीमां लख्या मुजब करीने पूजा करवी ते. ✱

श्रीम०नमः ॥ पुनराचमनीयंस०मि ॥ ॐतंयज्ञं०श्रये
॥ श्रीम०नमः ॥ वस्त्रंस०मि॥ ७ ॥ श्रीमहा०नमः॥
आचमनीयंस०मि॥ॐतस्माद्यज्ञात्सर्वहुतःसंभृतं०श्रये
॥ श्रीमहा०नमः॥ यज्ञोपवीतंस०मि ॥ ८ ॥ श्रीम०
नमः ॥ आचमनीयंस०मि ॥ ॐतस्माद्यज्ञात्सर्वहुतऋ
चः०र्यत ॥श्रीम०नमोगन्धंस०मि ॥९॥ ॐतस्मादश्वा
०वयः ॥ श्रीम०नमः ॥ पुष्पाणिस०मि ॥ १० ॥ ॐय
त्पुरुषंव्यदधुः०च्येते॥श्रीम०नमः।धूपंस०मि॥११॥
ॐब्राह्मणोस्य०यत ॥ श्रीम०नमोदीपंस०मि ॥ १२ ॥
ॐचंद्रमामनसो०यत ॥ श्रीम०नमः ॥ नैवेद्यंस०मि
॥ १३ ॥ श्रीम०नमः ॥ आचमनीयंस०मि ॥ ततोवै
दिकमन्त्रेणनीराजनं ॥ ॐयेदेवासोदिव्येकादशस्थ
पृथिव्यामध्येकादशस्थ ॥ अप्सुक्षितोमहिनैकादशस्थ
तेदेवासोयज्ञमिमंजुषध्वं ॥१॥ श्रीम०नमः । नीराजनं
स०मि ॥ ॐनाभ्याआसी०यन् ॥ श्रीम०नमः ॥ नम
स्कारंस०मि ॥ १४ ॥ ॐसप्तास्यासन्०पशुं०श्रीम०
नमः ॥ प्रदक्षिणांस०मि ॥ १५ ॥ यज्ञेनयज्ञ०देवाः ॥
श्रीम०नमः॥ पुष्पाञ्जलिंस०मि ॥ १६ ॥ अनेनपूज

टी.१ ते पछी वेदना मंत्र वडे नीराजन (आरती) करवुं.

मू. नेनश्रीमहाविष्णुःप्रीयतांनमम ॥ इतिकेवलविष्णु
पूजनकर्तुंप्रतिविष्णुपूजाप्रयोगः ॥ इत्यष्टधाविभक्तस्य
दिवसस्यप्रथमभागकृत्यं ॥ १ ॥ द्वितीयभागेवेदाभ्यासः
॥ २ ॥ तृतीयभागेपोष्यवर्गसाधनं ॥ ३ ॥ अ
थचतुर्थभागकृत्यं

॥ तत्रनित्यस्नानाविधिप्रयोगः ॥

केचिदत्राऽन्धपरंपरयाचतुर्दशीपरिशिष्टोक्त
स्नानविधिंकुर्वन्तितदसत् । यतःप्रयोगदीपेतत्परिशि
ष्टस्याऽनार्षकत्वंसविस्तरेणप्रतिपाद्यय: प्रयोगोलिखि
तःसोऽत्रलिख्यते ॥ कर्त्ताउपयुक्तोपकरणानि

टी. १. एरीते केवल विष्णुपूजानी इछवाला ने विष्णुपूजानो प्रयोग समाप्त थयो ॥ एरीते आठ प्रकारे विभाग करेला दीवसना प्रथम भागनुं कृत्य पुरु थयु ॥ १ ॥ बीजा भागमां वेदाभ्यास करवो ॥ २ ॥ त्रीजा भागमां कुटुंबवर्गना पोषणनु साधन करवुं. ३ ॥ हवे चोथा भागनुं कृत्य कहेछे.

॥ तेमां प्रथम नित्यस्नान विधिनो प्रयोग कहीये छैये ॥

॥ केटलाएक आ जगोये अंध परंपराये चतुर्दशी परिशिष्टमांकहेली स्नान विधि करेछे ते ठीक नथी. कारण के प्रयोग दीपमां दयाशंकरे ते परिशिष्टनुं सविस्तर अनार्षक पणुं प्रतिपादन करी जे प्रयोग कहेलो छे ते आठेकाणे लखीये छीये. कर्त्ता

गृहीत्वा नद्यादौ गत्वा रहसि तटं प्रक्षाल्य संभारां
स्तत्रसंस्थाप्य तीर्थदेवतां नमस्कृत्य विधिवदाचम्या
ञ्जलिं कृत्वा विष्णुं संस्मृत्य शनैर्मदा कण्ठादनुत्तारित
मुपवीतं संशोध्य गायत्र्या शिखां बध्वा मुसलवन्निम
ज्जेत् ॥ततः॥अतितीक्ष्णमहाकाय कल्पान्तदहनोपम॥
भैरवायनमस्तुभ्यमनुज्ञांदातुमर्हसि ॥ इतिभैरवं संप्रा
र्थ्य ॥ तत्त्वायामीत्याजिगर्तिःशुनःशेपःकृत्रिमोविश्वा
मित्रोदेवरातोवरुणस्त्रिष्टुप् ॥ अर्घ्यदाने विनियोगः ॥
ॐतत्त्वायामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविं
र्भिः ॥ अहेळमानोवरुणेहबोध्युरुशंसमानआयुःप्रमो
षीः ॥ १ ॥ वरुणएतत्तेऽर्घ्यंनमः ॥ इति वरुणायार्घ्यं

टी. नाहावाना उपयोगी पदार्थो (गायनु छाण, दूर्वा, अघेडो, तल, वीगेरे) लइ नदी वीगेरे ए जइ एकांत स्थले कांठो धोइ, उपरनां दर्भ वीगेरे त्यां मुकी, पाणीनी बाहार माटी वडे हाथ पग धोइ, बे हाथमां दर्भ राखी, तीर्थ देवताने नमस्कारकरी वीधीथी आचमनलइ हाथ जोडी विष्णुंनुं स्मरण करी धीमे धीमे माटी वडे कंठमांथी काहाडयाविना जनोइ साफ करी गायत्री वडे शिखा बांधी ने नाहावुं ते पछी " अतितीक्ष्णम० र्हसि " ॥ ए श्लोक वडे भैरवनी प्रार्थना करी ॥ ॐतत्त्वायामि० नमः ॥ एरीते वरुण ने अर्घ्य आपवुं॥

दद्यात् ॥ ततोगङ्गाया अर्घ्यंदद्यात् ॥ गङ्गा गङ्गेतियो ब्रूयाद्योजननां शतैरपि ॥ मुच्यते सर्वपापेभ्योविष्णु लोकं स गच्छति ॥ श्रीगङ्गे ! एतत्तेऽर्घ्यंनमः ॥ इतिग ङ्गाया अर्घ्यंदद्यात् * ॥ १ ॥ गङ्गाद्वारे प्रयागेच गङ्गा सागरसङ्गमे॥ सर्वत्र दुर्लभा गङ्गा त्रिस्थानेषु विशेषतः श्रीगङ्गेएतत्ते०मः ॥२॥ किरणा धूतपापा च पुण्यतोया सरस्वती ॥ गङ्गा च यमुना चैव पञ्चनद्यः पुनन्तु मां॥ श्रीपञ्चगङ्गाएतद्वोर्घ्यंनमः॥ इति पञ्चगङ्गाभ्योऽर्घ्यंद द्यात् ॥३॥ विष्णुपादाब्जसंभूते!गङ्गे त्रिपथगामिनि! ॥ धर्मद्रवेतिविख्याता पापं मे हरजान्हवि! ॥ श्रीगङ्गेए ०मः ॥ ४ ॥ जान्हवी सर्वतः पुण्या ब्रह्महत्यापहारि णी॥वाराणस्यां विशेषेण गङ्गाचोत्तरवाहिनी ॥ श्रीगङ्गे ए०॥ ५ ॥ षष्ठिकोटिसहस्राणि षष्ठिकोटिशतानिच ॥ सदा वसन्ति ते तीरे मध्यान्हे मणिकर्णिके!॥ श्रीमणि कर्णिकेए ० ॥ ६ ॥ काशिकातिरिक्तगङ्गायांकिरणेतिष ष्ठिकोटीत्यर्घदानेनभवतः ॥ अन्यतीर्थे तत्तत्तीर्थदेवता

टी. ते पछी गंगागंगेति० नमः॥ ए मंत्रे गंगाने अर्घ आपवो.*

१. काशी शीवायनी गंगामां "कीरणा०तुमां ॥३॥" एतथा 'षष्ठिकोटि०र्णिके ॥६॥' ए बे श्लोक वडे अर्घदान न करवा बीजा तीर्थमां ते ते तीर्थना देवने अर्घ्य आपवुं बीजा देवने

मू. यै अर्घ्यंदेयंनान्यस्यै॥तीर्थेन्तोर्थोतरंनस्मरेदितिस्मृतेः ॥ तत्रापिगङ्गांतुस्मरेदेव ॥ स्नानकाले ऽन्यतीर्थेषु जप्यतेजान्हवी जनैः॥ विनाविष्णुपदीं क्वान्यत्समर्थमघशोधने ॥ इतिस्कान्दात् ॥ तडागादौ सर्वाणि तीर्थान्यावाह्यार्घ्यं दद्यात् ॥ * ॥ पुष्कराद्यानि तीर्थानि गङ्गाद्याः सरितस्तथा॥ आगच्छन्तु पवित्राणि स्नानकाले सदा मम ॥ १ ॥ गङ्गागंगेतियो० ॥ २ ॥ गङ्गाद्वारेप्र० ॥ ३ ॥ किरणाधूत० ॥ ४ ॥ विष्णुपादाब्ज० ॥ ५ ॥ जान्हवोस० ॥ ६ ॥ षष्ठिकोटिस० ॥ ७ ॥ गङ्गाद्वारे कुशावर्ते बिल्वके नीलपर्वते ॥ स्नात्वा कनखले तीर्थे पुनर्जन्म न विद्यते ॥ श्री गङ्गेए० ॥ ८॥ आदित्यदुहितर्देवि! यमज्येष्ठेऽतिपाविनि! ॥त्रैलोक्यवन्दिते! वेणि! पापं मे यमुने! हर ॥ श्रीयमुनेए० ॥ ९ ॥ सरस्वति! नमस्तुभ्यं पवित्रे! पापनाशिनि! ॥हर त्वंपातकं

टी. न आपवुं कारण के एक तीर्थमां बीजा तीर्थनुं स्मरण न करवुं एम स्मृतिनुं वाक्य छे. माटे ते तीर्थोमां गंगानुं तो स्मरण करवुंज स्नान वखत बीजा तीर्थोमां मनुष्यो ए गंगानु स्मरण थाय कारण के ते गंगा शीवाय पाप धोवामां बीजुं कोइ तीर्थ क्याही पण समर्थ नथी. एम स्कंदनु वाक्य छे अने तळाव वीगेमां सर्व तीर्थोनुं आवाहन करी अर्घ्य आपवुं *

देवि! यन्मया पूर्वसञ्चितं ॥ श्रीसरस्वतिए० ॥ १० ॥ ब्रह्मकमण्डलुसंभूते सोमकान्तिसमप्रभे! ॥ त्रैलोक्यवन्दिते! मातर्हरपापं सरस्वति! ॥श्रीसरस्वतिए० ॥११॥ प्राचीनं पावितं कर्म मेरुतुल्यं चभारत!॥सिध्यन्ति सर्वकार्याणि प्राचीस्नानं यदाभवेत् ॥ श्रीप्राचीसरस्वतिए० ॥ १२॥ असीवरुणयोर्मध्ये पञ्चक्रोशीमहत्फलं ॥ अमराम्मृत्युमिच्छन्ति का कथा इतरेजनाः॥ श्रीपञ्चक्रोशि ए० ॥१३॥ गङ्गायमुनयोर्मध्ये यत्रगुप्तासरस्वती ॥ त्रैलोक्यवन्दिते! वेणि! गृहाणार्घ्यं नमोस्तुते ॥ श्रीत्रिवेणिए०॥१४॥विराञ्चितनया प्राचीह्युदीची विष्णुपादजा॥ प्रतीची यमुना यत्र मुक्तिस्तत्र न संशयः॥ श्रीत्रिवेणिए०॥१५॥ ओङ्कारे च भृगुक्षेत्रे तथारेवोरसङ्गमे ॥ सर्वत्र दुर्लभा रेवा त्रिस्थानेषु विशेषतः ॥ श्रीनर्मदेए० ॥ १६ ॥ प्रभाते वहते गङ्गा मध्यान्हे च सरस्वती ॥ अपराह्णे सर्वतीर्थानि रात्रौ वहति नर्मदा ॥श्रीनर्मदेए०॥१६॥ गोमती गोमयस्नानं गोदानं गोपिचन्दनं॥ दर्शनं गोपीनाथस्य गकाराःपञ्चदुर्लभाः॥श्रीगोमतिए०॥१८॥ ब्रह्मज्ञानेन मुच्यन्ते प्रयागमरणेनवा ॥ अथवा स्नानमात्रेण गोमत्यां कृष्णसन्निधौ ॥ श्रीगोम

तिए०॥१९॥प्रयागे वपनंकुर्यान्मरणंजान्हवीतटे॥दानं दद्यात्कुरुक्षेत्रे तत्त्रयं गोमतीतटे॥श्रीगोमतीए०॥२०॥ गङ्गाच वैष्णवीमूर्त्तिर्ब्रह्ममूर्तिःसरस्वती ॥ रेवाचशाङ्करी मूर्तिस्तिस्त्रोनद्यः पुनन्तुमां॥ श्रीत्रिवेणि ए०॥२१॥ [१]एतदशक्तो गङ्गाया एव द्वादश नामानि स्मरेत् ॥ तथाच स्कान्देगङ्गावाक्यं ॥"नन्दिनी १नलिनी २ सीता ३ मालती ४ चमहापगा ५॥ विष्णुपादाब्जसंभूता ६ गङ्गा ७ त्रिपथगामनी ८ ॥ १ ॥ भागीरथी९ भोगवती १० जान्हवी ११ त्रिदशेश्वरी १२ ॥द्वादशैतानि नामानि यत्र यत्र जलाशये ॥ २ ॥ स्नानोद्यतः पठेन्नित्यं तत्र तत्र वसाम्यहं"॥ इति [२]अनुत्सृष्टतडागादौ तस्मात्पञ्च मृत्पिण्डानुद्धृत्यस्नायात् ॥ततोमृत्खननम्॥ अगस्त्यइत्यनुक्तगोत्रोंऽन्तेवासीब्रह्मचारिरितिस्त्रिष्टुप्॥ मृत्खनने विनियोगः ॥ ॐअगस्त्यःखनमानःखनित्रैः प्रजामपत्यंबलमिच्छमानः ॥ उभौवर्णा

१. एटला श्लोको भणवानी अशक्ति होयतो गंगानां बार नामोनुं स्मरण करवुं ते प्रमाणे स्कंपुराणमां गंगानुं वाक्यछे.

२. जलोत्सर्ग कर्यावगरना तलाव, वीगेरेमां तेमांथी माटीना पांच पिंडो. बाहार काहाडीने नाहावुं ते पछी माटीखोदवी

दृषिरुग्रःपुंपोषसत्यादेवेष्वाशिषोजगाम ॥ १ ॥ इति खनित्रेण मृत्तिकाखननं ॥चतुरङ्गुलपरिमितं गर्त्तंकृत्वो परितनां मृत्तिकां परित्यज्य ॥ अन्तःस्थामश्वक्रान्त इत्यामन्त्र्य ॥अश्वक्रान्ते!रथक्रान्ते!विष्णुक्रान्ते! वसुन्धरे!॥मृत्तिके!हरमेपापं यन्मया पूर्वसञ्चितं ॥१॥ उत्धृतासीत्युत्धृत्य ॥ उत्धृतासि वराहेण कृष्णेन शतबाहुना ॥ मृत्तिके ! हर मे पापं यद्दैवं यच्च मानुषम् ॥इति ॥२॥ दक्षिणहस्तेन शिरसि तूष्णींसकृदनुलिप्य ॥ द्विर्नाभेरुपरितनेष्वङ्गेष्वनुलिप्य ॥वामकरेण नाभेरधस्तादापादंत्रिरनुलिम्पेत् ॥ ततोगोमयमादायाग्रमग्रमितिद्वाभ्य मानस्तोक इत्यनेन चाभिमन्त्र्य ॥ अग्रमग्रं

---

१. ए मंत्रे खोदवाना पदार्थो (कोश वीगेरे) वडे माटी खोदवी ने चार आंगलनो चोरस तथा उंडो खाडो करी उपरनी माटी काहाडी नांखी अंदरनी माटीनुं ॥ "अश्वक्रांते०चितं"॥ ए मंत्रे छेली आंगलीनी पासेनी आंगलीवडे अभिमंत्रण करी॥ "उत्धृतासि० नु षं" ए मंत्रेमाटी लेइ पाणीथी पलाळी जमणा हाथे मंत्र वगर माथा उपर एकवार तेमज नाभिना उपरना अंगोउपर बेवार चोपडी डाबाहाथे नाभिनी नीचे पग सुधी त्रणवार चोपडवी ते पछी गायनुं छाण. लइ ॥ "अग्रमग्र० धनं" ए बे मंत्रे तथा "मानस्तोके०महे" ॥ ए मंत्रे अभिमंत्र

चरन्तीनामोषधीनां रसं वने ॥ यन्मे रोगं च शोकं
तन्मे दहतु गोमयं ॥ १ ॥ अग्रम०वने ॥ तासां वृषभ
पत्नीनांपवित्रंकायशोधनं ॥ २ ॥ मानस्तोकइत्यस्याः
कुत्सआङ्गिरसोरुद्रोजगती ॥ गोमयालेपनेविनियोगः
॥ ॐमानस्तोकेतनयेमानआयौमानोगोषुमानोअश्वेषु
रीरिषः ॥ वीरान्मानोरुद्रभामितोवधीर्हविष्मंतःसदमि
त्वाहवामहे ॥१॥ तत्सूर्यायप्रदर्श्यतच्छरीरेमृद्वदनुलि
त् ॥ ततोदूर्वामादाय ॥ ॐकांडात्कांडात्प्ररोहंतिपरुषःप
रुषस्परि ॥ एवानोदूर्वेप्रतनुसहस्रेणशतेनच ॥ १ ॥
याशतेनप्रतनोषिसहस्रेणविरोहसि ॥ तस्यास्तेदेवीष्ट
केविधेमहविषावयं ॥ २ ॥ आयनेतइत्यनेनदूर्वांकुरैर्मा
जयेत् ॥ आयनेतइतिशार्ङ्गस्तंबमित्रोग्निरनुष्टुप् ॥ दू
र्वांकुरैर्मार्जनेविनियोगः ॥ ॐआयनेतेपरायणेदूर्वारोहं
तुपुष्पिणीः ॥ ह्रदाश्चपुंडरीकाणिसमुद्रस्यगृहाइमे ॥
॥ १ ॥ ततोऽपामार्गमादाय ॥ ॐअपाघमपाकिल्बिषम

णकरी ते सूर्यने देखाडी ते छांण माटीनी जेम शरीर उपर
चोपडवुं ते पछी ॥ कांडात्कांडात्प्र०वयं ॥ ए मंत्रे दूर्वालेइ
आयनेतेप०इमे ॥ ए मंत्रे दूर्वाना अंकुरोए मार्जनकरी ते
पछी अघेडोलेइ ॥ अपाघ०सुव ॥ ए मंत्रे मार्जन करवुं.

पंकृत्यासपोरपः॥ अपामार्गत्वमस्माकमपदुष्वप्न्यंसुव ॥१॥ इत्यपामार्गैर्मार्जयेत् ॥ दूर्वापामार्गैर्मार्जननावश्यकं॥ कृतेतुफलभूयस्त्वं ॥ ततोदर्भैर्मार्जनं ॥ * पवित्रवन्तइतिपवित्रआङ्गिरसःपवमानःसोमोजगती ॥ दर्भग्रहणेविनियोगः ॥ ॐपवित्रवंतःपरिवाचमासतेपितैषांप्रत्नोअभिरक्षतिव्रतं ॥ महःसमुद्रंवरुणस्तिरोदधेधीराइच्छेकुर्धरुणेष्वारभं ॥ इतिदर्भान्परिगृह्य ॥तद्विष्णोरितिमेधातिथिःकाण्वोविष्णुर्गायत्री ॥ दर्भैर्मार्जनेविनियोगः ॥ ॐतद्विष्णोःपरमंपदंसदापश्यंतिसूरयः ॥ दिवीवचक्षुराततं ॥ १ ॥ अंबयोयंतीतिनवर्चस्यसूक्तशेषस्यमेधातिथिःकाण्वआपोगायत्र्यन्त्याध्यर्द्वाग्नेय्यस्वंतःपुरउष्णिक्परानुष्टुप्तिस्रश्चांत्याआपःप्रणीतेति प्रतिष्टा ॥ दर्भैर्मार्जनेविनियोगः ॥ ॐअंबयोयंत्यध्वभिर्जामयोअध्वरीयतां ॥ पृंचतीर्मधुनापयः ॥ १ ॥ अमूर्याउपसूर्येयाभिर्वासूर्यःसह ॥ तानोहिन्वंत्यध्वरं ॥ २ ॥ अपोदेवीरुपव्हयेयत्रगावःपिबंतिनः ॥ सिंधुभ्यःकर्त्वंहविः

दूर्वा तथा अघेडावडे मार्जननी जरूरी नथी ने करेतो फळ घणुंछे ॥ ते पछी दर्भवडे मार्जन (ऋचानाअंते. अथवा अरधीरीचाए) करवुं *

॥ ३ ॥अप्स्वं ; तरमृतं मप्सुभेषजमपामुतप्रशस्तये
देवाभवतेवानः ॥ ४ ॥ अप्सुमेसोमोअ
श्वानिभेषजा ॥ अग्निंचविश्वशंभुवमापश्चविश्वभेषजी
॥ ५ ॥ आपःपृणीतभेषजंवरूथंतन्वे३मम ॥
सूर्यंदृशे ॥ ६ ॥ इदमापःप्रवहतयत्किंचदुरितंमयि
यद्वाहमभिदुद्रोहयद्वाशेपउतानृतं ॥ ७ ॥
न्वचारिषंरसेनसमगस्महि ॥ पयस्वानग्नआ हि
संसृजवर्चसा ॥ ८ ॥ संमाग्नेवर्चसासृजसंप्रजयासमायु
षा॥ विद्युर्मेअस्यदेवाइंद्रोविद्यात्सहऋषिभिः ॥ ९ ॥
इतिनवर्चसूक्तं ॥ १० ॥ उदुत्तमंवरुणेत्याजीगर्तिः
नःशेपःकृत्रिमोवैश्वामित्रोदेवरातोवरुणास्त्रिष्टुप् ॥ द
र्माजनेवि० ॥ ॐउदुत्तमंवरुणपाशमस्मदवाधमंविमध्य
मंश्रथाय ॥ अथावयमादित्यव्रतेतवानागसोअदितये
स्याम ॥ ११ ॥ इमंमेवरुणेतिद्वयारोजीगर्तिर्वरुणोगा
यत्री ॥ दर्भैर्माजनेवि० ॥ ॐइमंमेवरुणश्रुधीहवमद्या
चमृळय ॥ त्वामवस्युराचके ॥ १२ ॥ त्वंविश्वस्यमेधि
रादिवश्चग्मश्चराजसि ॥ सयामनिप्रतिश्रुधि ॥ १३ ॥
त्वन्नोअग्नेवरुणस्योतिद्वयोर्वामदेवोगौतमोग्निवरुणौत्रि
ष्टुप् दर्भैर्माजनेवि ० ॥ॐत्वन्नोअग्नेवरुणस्यविद्वान्देवस्य

हेळोवयासिसीष्ठाः ॥ यजिष्ठोवन्हितमःशोशुचानोवि
श्वाद्वेषांसिप्रमुमुग्ध्यस्मत् ॥ १ ॥ सत्वन्नोअग्नेवमोभ
वोतीनेदिष्ठोअस्याउषसोव्युष्टौ ॥ अवयक्ष्वनोवरुणंर
राणोवीहिमृळीकंसुहवोनएधि ॥ २ ॥ १९ ॥ समुद्रादु
र्मिरित्येकादशर्चस्यसूक्तस्यवामदेवोगौतमआपास्त्रिष्टुबं
त्याजगती ॥ दर्भैर्मार्जनेवि० ॥ ॐसमुद्रादूर्मिमधुमांउ
दारदुपांशुनासममृतत्वमानट् ॥ घृतस्यनामगुह्यंयद
स्तिजिव्हादेवानाममृतस्यनाभिः॥१॥वयंनामप्रब्रवामा
घृतस्यास्मिन्यज्ञेधारयामानमोभिः ॥ उपब्रह्माशृणव
च्छस्यमानंचतुःशृंगोवमीद्गौरएतत् ॥ २ ॥ चत्वारिशृंगा
त्रयोअस्यपादाद्वेशीर्षेसप्तहस्तासोअस्य ॥ त्रिधाबद्धो
वृषभोरोरवीतिमहोदेवोमर्त्याआविवेश ॥ ३ ॥ त्रिधा
हितंपणिभिर्गुह्यमानंगविदेवासोघृतमन्वविंदन् ॥ इंद्र
एकंसूर्यएकंजजानवेनादेकंस्वधयानिष्टतक्षुः ॥ ४ ॥ ए
ताअर्षंतिहृद्यात्समुद्राच्छतव्रजारिपुणानावचक्षे ॥ घृत
स्यधाराअभिचाकशीमिहिरण्ययोवेतसोमध्यआसां ॥
५ ॥ सम्यक्स्रवंतिसरितोनधेनाअंतर्हृदामनसापूयमा
नाः॥एतेअर्षंत्यूर्मयोघृतस्यमृगाइवक्षिपणोरीषमाणाः

॥ ६ ॥ सिंधोरिवप्राध्वनेशूघनासोवातप्रमियःपतयं
तियव्हाः ॥ घृतस्यधाराअरुषोनवाजीकाष्ठाभिंदन्नूर्मि
भिःपिन्वमानाः ॥ ७॥ अभिप्रवंत समनेवयोषाःकल्या
ण्यं३स्मयमानासोअग्निं ॥ घृतस्यधाराः समिधोनसंत
ताजुषाणोहर्यतिजातवेदाः ॥ ८॥ कन्याइववहतुमेतवा
उअंज्यंज्यानाअभिचाकशीमि ॥ यत्रसोमःसूयतेयत्रय
ज्ञोघृतस्यधाराअभितन्पवंते ॥ ९ ॥ अभ्यर्षतसुष्टुतिं
गव्यमाजिमस्मासुभद्राद्रविणानिधत्त ॥ इमंयज्ञंनः
देवतानोघृतस्यधारामधुमत्पवंते ॥ १० ॥ धामंतेवि
श्वंभुवनमधिश्रितमंतःसमुद्रेहृद्यं ; तरायुषि ॥ अपाम
नीकेसमिथेयआभृतस्तमश्यामममधुमंतंतऊर्मिम् ॥ ११॥
॥ २६ ॥ प्रसंम्राजेबृहदित्यष्ठर्चसूक्तस्यभौमोत्रिवरुण
स्त्रिष्टुप् ॥ दर्भैर्मार्जनेवि० ॥ प्रसंम्राजेबृहदर्चागभीरंब्र
ह्मप्रियंवरुणायश्रुताय ॥ वियोजघानशमितेवचर्मोप
स्तिरेपृथिवींसूर्याय ॥ १ ॥ वनेषुव्यं ; तरिक्षंततानवा
जमर्वत्सुपयउस्त्रियासु ॥ हृत्सुक्रतुंवरुणोअप्स्व ; ग्निंदिवि
सूर्यमदधात्सोममद्रौ ॥ २ ॥ नीचीनबारंवरुणःकवंधंप्र
ससर्जरोदसीअंतरिक्षं ॥ तेनाविश्वस्यभुवनस्यराजाय

वंनद्रष्टिर्व्युनत्तिभूमं ॥ ३ ॥ उनत्तिभूमिंपृथिवीमुतद्यां
यदादुग्धंवरुणोवष्टचादित् ॥ समभ्रेणवसतपर्वतासः
स्तविषी यंतःश्रथयंतवीराः ॥ ४ ॥ इमामूष्वासुर
स्यश्रुतस्यमहीमायांवरुणस्यप्रवोचं ॥ मानेनेवतस्थिवां
अंतरिक्षेवियोममेपृथिवींसूर्येण ॥ ५ ॥ इमामूनुकवि
तमस्यमायांमहींदेवस्यनकिरादधर्ष ॥ एकंयदुद्नानपृ
णंत्येनीरासिंचंतीरवनयःसमुद्रं ॥ ६ ॥ अर्यम्यंवरुण
मित्र्यंवासखायंवासदमिद्भ्रातरंवा ॥ वेशंवानित्यंवरुणा
रणंवायत्सीमागश्चकृमाशिश्रथस्तत् ॥ ७ ॥ कितवा
सोयद्रिरिपुर्नदीवियद्वाघासत्यमुतयन्नविद्म ॥ सर्वाता
विष्यशिथिरेवदेवाधातेस्यामवरुणप्रियासः ॥८॥३४॥
एतोन्विंद्रमितित्र्यृचस्यातिरश्चीरांगिरसइंद्रोनुष्टुप् ॥ द
र्भैर्मार्जनेवि० ॥ ॐएतोन्विंद्रंस्तवामशुद्धंशुद्धेनसाम्ना ॥
शुद्धैरुक्थैर्वावृध्वांसंशुद्धआशीर्वान्ममत्तु ॥ १ ॥ इंद्रशु
द्धोनआगहिशुद्धःशुद्धाभिरूतिभिः ॥ शुद्धोरयिंनिधारय
शुद्धोममद्धिसोम्यः ॥ २ ॥ इंद्रशुद्धोहिनोरयिंशुद्धोर
त्नानिदाशुषे ॥ शुद्धोवृत्राणिजिघ्नसेशुद्धोवाजंसिषास

सि ॥ ३ ॥ ३७ ॥ स्वादिष्ठयेतिदशर्चस्यसूक्तस्यमाधु
दावैश्वामित्रः पवमानः सोमोगायत्री दर्भैर्मार्जने वि
योगः ॥ ॐस्वादिष्ठयामदिष्ठयापवस्वसोमधारया ॥
इंद्रायपातवेसुतः ॥ १ ॥ रक्षोहाविश्व
योहतं ॥ द्रुणासधः स्थमासदत् ॥ २ ॥ वरिवो
भवमंहिष्ठोवृत्रहंतमः ॥ पर्षिराधोमघोनां ॥ ३ ॥ अ
र्षमहानांदेवानांवीतिमंधसा ॥ अभिवाजमुतश्रवः॥४।
त्वामच्छाचरामसितदिदर्थंदिवेदिवे॥ इंदोत्वेनआशसः
॥५॥ पुनातितेपरिस्रुतंसोमंसूर्यस्यदुहिता ॥ वारेणश
श्वताातना ॥ ६ ॥ तमीमण्वीः समर्यआगृभ्णंतियोष
णोदश ॥ स्वसारः पार्येदिवि ॥ ७ ॥ तमींहिन्वंत्य
ग्रुवोधमंतिबाकुरंदतीं ॥ त्रिधातुवारणंमधु॥ ८ ॥ अभी
३ ममघ्न्या उतश्रीणंतिधेनवः शिशुं ॥ सोममिंद्राय
पातवे ॥ ९ ॥ अस्येदिंद्रोमदेष्वाविश्वावृत्राणिजिघ्न
ते ॥ शूरोमघाचमंहते ॥ १० ॥ ४७ ॥ सनाचसोमे
तिदशर्चस्यसूक्तस्याहिरण्यस्तूपआंगिरसः पवमानः सो
मोगायत्री ॥ दर्भैर्मार्जने वि० ॥ ॐ सनाचसोमजेषिच
पवमानमहिश्रवः ॥ अथानोवस्यसस्कृधि ॥ १ ॥ स

नाज्योतिः सनास्व०विश्वाचसोमसौभगा ॥ अथानो ०
धि ॥ २ ॥ सनादक्षमुतक्रतुमपसोममृधोजहि ॥ अथा
नो० धि ॥ ३ ॥ पवीतारः पुनीतनसोममिंद्रायपातवे
॥ अथानो० धि ॥ ४ ॥ त्वंसूर्येनआभजतवक्रत्वातवो
तिभिः ॥ अथानो० धि॥ ५ ॥ तवक्रत्वातवोतिभिर्ज्यो
क्पश्येमसूर्यं ॥ अथानो०धि ॥ ६ ॥ अभ्यर्षस्वायुध
सोमद्विबर्हसंरयिं ॥ अथानो०धि ॥ ७॥ अभ्या०र्षान
पच्युतोरयिंसमत्सुसासहिः ॥ अथानो०धि ॥ ८ ॥
त्वांयज्ञैरवीवृधन्पवमानविधर्मणि॥अथानो०धि ॥९॥
रयिंन्नश्चित्रमश्विनमिंदोविश्वायुमाभर ॥अथानो ० धि
॥ १० ॥ ५७ ॥ प्रसुवआपइतिनवर्चस्यसूक्तस्यसिंधु
क्षित्प्रैय्यमेधोनदीस्तुतिर्जगती ॥ दर्भैर्मार्जनेवि० ॥ ॐ
प्रसुवआपोमहिमानमुत्तमंकारुर्वोचातिसदनेविवस्वतः
॥ प्रसप्तसप्तत्रेधाहिचक्रमुःप्रसृत्वरीणामतिसिंधुरोजसा
॥ १ ॥ प्रतेरदद्वरुणोयातवेपथःसिंधोयद्वाजाँअभ्यद्रव
स्त्वं ॥ भूम्याअधिप्रवतायासिसानुनायदेषामग्रंजगता
मिरज्यसि ॥ २ ॥ दिविस्वनोयततेभूम्योपर्यनंतंशुष्ममु
दियर्त्तिभानुना ॥ अभ्रादिवप्रस्तनयंतिवृष्टयःसिंधुर्यदे
तिवृषभोनरोरुवत् ॥ ३ ॥ अभित्वासिंधोशिशुमिन्नमा

तरोवाश्राअर्षतिपर्यसेवधेनवः॥ राजेवयुध
मिस्सिचौयदासामग्रंप्रवतामिनक्षसि ॥ ४ ॥ इमंमेगंगे
यमुनेसरस्वतिशुतुद्रिस्तोमंसचतापरुष्ण्या ॥ असि
क्न्यामरुद्वृधे वितस्तयार्जीकीयेशृणुह्यासुषोमया ॥
खिल ॥ सितासितेसरितेयत्रसंगेतत्राप्लुतासोदिवमुत्प
तंति ॥ एवैतन्वं ; विसृजंतिधीरास्तेजनासोअमृत
त्वंभजंते ॥ ५ ॥ तृष्टामयाप्रथमंयातवेसजूः सुसर्त्वारस
याश्वेत्यात्या॥ त्वंसिंधोकुभयागोमतींक्रुमुंमेहत्न्वासरथं
याभिरीयसे ॥ ६ ॥ऋजीत्येनीरुशतीमहित्वापरिज्रयां
सिभरतेरजांसि ॥ अदब्धासिंधुरपसामपस्तमाश्वान
चित्रावपुपीवदर्शता ॥ ७ ॥ स्वश्वासिंधुःसुरथासुवासा
हिरण्ययीसुकृतावाजिनीवती ॥ ऊर्णावतीयुवतिःसील
मावत्युताधिवस्तेसुभगामधुवृधं ॥ ८ ॥ सुखंरथंयुयुजे
सिंधुरश्विनंतेनवाजंसनिषदस्मिन्नाजो ॥ महान्ह्यस्यम
हिमापनस्यतेदब्धस्यस्वयशसोविरप्शिनः ॥ ९ ॥ ६६ ॥
ततोदेशकालावुच्चार्य सकल पापक्षयकामः श्रीपर
मेश्वरप्रीत्यर्थं अस्मिन्विष्णुतीर्थेस्नानमहंकरिष्ये ॥ इ

टी. १. ते मार्जन थइ रह्या पछी पत्र २० वा ८५ ना
टीप्पणमां लख्या मुजब देशकालनुं कीर्तन करी " सकल०

तिसङ्कल्प्य ॥ ततोजलमध्येचतुर्हस्तंचतुरस्रं ' ॐनमोनारायणाय'इतितीर्थंप्रकल्पयेत् ॥पूर्वोक्ततीर्थावाहनमन्त्रमुकं ॥ संप्रदायानुरोधात्पूर्वोलिखितमितिबोध्यं ॥ ततः शिखांविमुच्यकेशान्द्विधाकृत्वाङ्गुष्ठाङ्गुलिभिः श्रोत्रदृङ्नासिकामुखंपिधाय ॥ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदं ॥ समूढमस्यपांसुरे ॥ इतिविष्णुंसंस्मृत्यनद्यांप्रवाहाभिमुखोऽन्यत्रसूर्याभिमुखोनिमज्जेत् ॥ एवंत्रिःषट्कृत्वोद्वादशकृत्वोवाशक्त्यानिमज्ज्य पुनर्जलेनिमग्नःऋतंचेतिसूक्तस्यात्रिःसकृद्वाजपेनाघमर्षणंविदध्यात् ॥

रिष्ये" ए रीते संकल्प करी तेपछी जळना मध्यमां चार हाथना चतुरस्र (चोखंडुं) ने " ॐनमो०य "ए मंत्रे तीर्थनी कल्पना करवी ने तेमां प्रथम कहेला तीर्थनुं आवाहन आ ठेकाणे घटितछे परंतु संप्रदायथी विरुद्धछे माटे पेहेलां लखेलुंछे एम जाणवुं ॥ ते पछी शिखा छोडी केशोना बे विभाग करी बे हाथना अंगोठा तथा आंगळी वडे कांन, आंख, नाक, अने मुखने ढांकी "इदं विष्णु ० सुरे" ए मंत्रे विष्णुंनुं स्मरण करी नदीमां प्रवाहना सांमे मुखे ने ते शीवाय सूर्यनी सामे मुखे नाहावुं ए रीते त्रणवार छवार अथवा बारवार शक्ति प्रमाणे नाही फरी जळमां डुपतां "ऋतंच०स्वः " ए सूक्तना त्रण अथवा एकवार जप वडे अघर्षमण (पाप शोधन) करवुं ॥

मू. ऋतंचेतिसूक्तस्यमाधुच्छंदसोघमर्षणोभाववृतानुष्टुप्॥ अघमर्षणेविनियोगः ॥ ऋतंचसत्यंचाभीद्धात्तपसोध्यंजायत ॥ ततोरात्र्यंजायततततः समुद्रोअर्णवः॥ १ ॥ समुद्रादर्णवादधिसंवत्सरोअजायत ॥ अहोरात्राणिविदधद्विश्वस्यमिषतोवशी ॥ २ ॥ सूर्याचंद्रमसौधातायथापूर्वमकल्पयत् ॥ दिवंचपृथिवींचांतरिक्षमथोस्वः॥ ३ ॥ ततःशिखांबध्वाऽऽचम्यजलस्थएवप्राङ्मुखऋजुदर्भैर्देवतीर्थादिनोक्तवद्वक्ष्यमाण नित्यतर्पणवद्वास्नानांगतर्पणंकृत्वाद्विराचामेत् ॥ ततोजलादुत्क्रम्यापोअस्मानितिजपेत् * ॥ आपोअस्मानिति देवश्रवायाग्नाय नआपस्त्रिष्टुप् ॥ जपेविनियोगः ॥ ॐआपोअस्मान्मातरःशुंधयंतुघृतेननोघृतप्वःपुनंतु ॥ विश्वंहिरिप्रंप्रवहंतिदेवीरुदिदाभ्यःशुचिरापूतएमि ॥ १ ॥ ततोधौ

टी० १. ते पछी शिखाबांधी आचमन लइ जलमां उभेज पूरवसांमा मुखे पाधरादर्भवडे देव, पितृ, अने मनुष्यतीर्थवडे प्रथम कहेला पत्र २३ मांना स्नानांग तर्पणनीपठे अथवा आगलना नित्यतर्पणनीपेठे स्नानांग तर्पणकरी बेवार अचमन करवुं॥ ते पछी जळनी बाहार नीशरी "आपोअस्मान्मा०एमि" एमंत्रजपवो *.

२. ते पछी धोयेल वस्त्र पेहेरी तथा ओढि विधि प्रमाणे

तेवाससीपरिधायविधिवत्तिलकंविदध्यात् ॥ अशक्तौप्रा
तर्वत्स्नायात् ॥ अत्यशक्तस्यमन्त्रस्नानं ॥ योगी ॥
येनस्नातादिवंयान्तिश्रद्धानाद्विजोत्तमाइति ॥ यथा
हनि तथा प्रातर्नित्यं स्नायादनातुरइति कात्यायन
वाक्येनित्यपदप्रयोगात्स्नानंनित्यं ॥ इतिनित्यस्नान
विधिः ॥ सार्द्धप्रहरात्सायंयावन्मध्यान्हसन्ध्यांकुर्यात्॥

अथ मध्यान्हसन्ध्याप्रयोगः

प्रातःसंध्यावत्सर्वं ॥ विशेषोयथा ॥ सङ्कल्पे ॥ * म

तिलक करवुं॥आरीते नाहावामां अशक्ति होय तो प्रातःस्ना
नना विधि प्रमाणे नाहाय अति अशक्त प्रथमना पत्र १९मुजब
मंत्र स्नान करवुं. स्नानाविषे योगी कहेछेके॥ जे स्नांन विधिये
नाहायेला श्रद्धावाळा उत्तम ब्राह्मणो स्वर्गने पामेछे ॥ तथा
रोगवगरनो ब्राह्मण जे प्रमाणे मध्यान्हे स्नान विधिये हंमेश
नाहाय ते प्रमाणे प्रातःकाले पण नाहाय एरीतना कात्याय
नना काक्यमां " नित्य " एहेवुं पद कह्युंछे. माटे स्नांनावि
धिये स्नान करवुं ते अवश्यछे ॥ एरीते नित्य स्नानाविधि
पुरो थयो ॥ डोढपोहोर दीवसपछी सायंकाळसुधीमां मध्या
न्ह संध्या करवीते ॥

॥ हवे मध्यान्ह संध्यानो प्रयोग कहेछे ॥

तेमां तमाम प्रातःसंध्यामुजबछे, ते शीवाय विशेष
भाग आप्रमाणे संकल्पमां *

ध्यान्हसन्ध्योपासनमहंकरिष्ये ॥ [1]प्राणायामानन्तरमा-
चमनेमंत्रः ॥ * आपःपुनंत्वित्यस्ययाज्ञवल्क्युपनिष-
षिः ॥ पूतोवाआपः पृथिवीब्रह्मणस्पतिर्ब्रह्मदेवताः ॥
अष्टपदाष्टिच्छंदः ॥ आचमनेविनियोगः ॥ ॐआपः
पुनंतुपृथ्वींपृथिवीपूतापुनातुमां ॥ पुनंतुब्रह्मणस्पति
र्ब्रह्मपूतापुनातुमां ॥ यदुच्छिष्टमभोज्यंयद्वादुश्चरितंम
म ॥ सर्वंपुनंतुमामापोऽसतांचप्रतिग्रहंस्वाहा ॥ [2]सकृदं
जलिप्रक्षेपः ॥ उक्तोपस्थानांतोविभ्राड्बृहदित्यादीच्छया
वाजपेत् ॥ यथा * ॥ विभ्राडितिऋच्कतुष्टयात्मकस्यसूक्त
स्यसौर्यःसूर्योजगत्यन्त्याऽस्तारपङ्क्तिः ॥ उपस्थानेविनि
योगः ॥ ॐविभ्राड्बृहत्पिबतुसोम्यंमध्वायुर्दधद्यज्ञपताव
विह्रुतं ॥ वातजूतोयोअभिरक्षतित्मनाप्रजाःपुपोषपुरु
धाविराजति ॥ १ ॥ विभ्राड्बृहत्सुभृतंवाजसातमंधर्म
दिवोधरुणेसत्यमर्पितं ॥ अमित्रहावृत्रहादस्युहंतमंज्यो
तिर्जज्ञेअसुरहासपत्नहा ॥ २ ॥ इदंश्रेष्ठंज्योतिषांज्योति

---

१. प्राणायाम पछी आचमनमांनो मंत्र ॥

२. एकवार अंजळि आपवो प्रथम पत्र ४७ मां कहेला उपस्थानना छेवटे ॥ विभ्राड्बृ० ॥ इत्यादिमंत्रो विकल्पछे माटे अभिलाषावडे जपवा. *

रुत्तमंविश्वजिद्धनजिदुच्यतेबृहत् ॥ विश्वभ्राड्भ्राजोम
हिसूर्योदृशउरुपप्रथेसहओजोअच्युतं ॥ ३ ॥ विभ्राजं
ज्योतिषास्वः रगच्छोरोचनंदिवः ॥ येनेमाविश्वाभुव
नान्याभृताविश्वकर्मणाविश्वदेव्यावता ॥४॥ ततोगाय
त्रीमष्टोत्तरसहस्रमष्टोत्तरशतं वा दशवारं वा जपेत् ॥
इति मध्यान्हसंध्याप्रयोगः ॥

॥अथशिष्टपरिगृहीतब्रह्मयज्ञप्रयोगः ॥

कर्तायथोक्तकालेऽरण्येतीर्थेस्वगृहेवाशुचिःशुचौदेशेद
र्भानास्तीर्यप्राङ्मुखउपविश्यपवित्रपाणिराचम्यप्राणा
नायम्य ॥ देशकालौसङ्कीर्त्य ॥ "ममोपात्तदुरितक्ष

टी.॥१॥तेपछीगायत्री एकहजार आठवार१००८अथवा एकसो
आठवार १०८ वार अथवा दशवार जपवी. ॥ एरीते मध्या
न्हसंध्यानो प्रयोग पुरो थयो. ॥

हवे शिष्टपुरुषोए ग्रहणकरेलो ब्रह्मयज्ञनो प्रयोग
केहेछे.

कर्त्ता कहेला वखते (आवखत अथवा प्रातःसंध्या
पछी अथवा वैश्वदेवनी समाप्तिये) अरण्यमां, तीर्थने कांठे,
अथवा पोतानेघेर पवित्रथइ पवित्र जग्याए दर्भो उत्तराग्र पा
थरी ते उपर उगमणे मुखे बेशी पवित्रुं हाथमां राखी, आ
चमन प्राणायामकरी पत्र२०नाटीप्पणप्रमाणे देशकालनुं कीर्त्त

यद्वाराश्रीपरमेश्वरप्रीत्यर्थंब्रह्मयज्ञमहंकरिष्ये"॥ इति संङ्कल्प्याऽऽचम्यवामजानूपरिदक्षिणंपादंनिधायदक्षिणजानुन्यधउत्तानस्थवामकरस्योपरिपवित्रंनिधायतदुपरिदक्षिणंकरंन्युब्जंनिधाय द्यावापृथिव्योः संधिमीक्ष्यमाणोमध्यमांवृत्तिमास्थायपठेत् ॥ * गौतमोराहुगणोविश्वेदेवाअनुष्टुप् ॥ उँशन्नोमित्रःशंवरुणःशन्नोभवत्वर्यमा ॥ शन्नइंद्रोबृहस्पतिः शन्नोविष्णुरुरुक्रमः ॥ १ ॥ स्वस्तिनइंद्रइत्यस्यगौतमोराहुगणोविश्वेदेवाविराट्स्थाना ॥ उँस्वस्तिनइंद्रोवृधश्रवाःस्वस्तिनःपूषाविश्ववेदाः ॥ स्वस्तिनस्तार्क्ष्योअरिष्टनेमिः स्वस्तिनोबृहस्पतिर्दधातु ॥ २ ॥ सुतासोमधुमत्तमइतिद्वयोर्ऋचोर्नाहुषोययातिः पवमानःसोमोनुष्टुप् ॥ उँसुतासोमधुमत्तमाःसोमाइंद्रायमंदिनः ॥ पवित्रवंतोअक्षरन्देवान्गच्छंतुवोमदाः ॥ १ ॥ इंदुरिंद्रायपवतइतिदेवासो

नकरी " ममोपात्त० करिष्ये "एरीते संकल्पकरी, आचमन लइ, डाबापगना गोठणउपर जमणो पग मुंकी, जमणा गोठण उपर नीचे चतोराखेलडाबा हाथ उपर पवित्रं मुंकी, तेनाउपर जमणो हाथ उंधोराखी आकाश तथा पृथिवीनी संधिने जोतां जोतां मध्यम वृत्तीराखी भणवुं*

अब्रुवन् ॥ वाचस्पतिर्मखस्यतेविश्वस्येशानओजसा ॥ २ ॥ ॥ ४ ॥ ॐकारस्यब्रह्मापरमात्मादेवीगायत्री ॥ भूरित्यस्यगाथिनोविश्वामित्रोग्निर्गायत्री ॥ भुवइत्यस्यभार्गवोजमदग्निर्वायुरुष्णिक् । स्वरित्यस्यबार्हस्पत्यो भरद्वाजःसूर्योनुष्टुप् ॥ तदितिगाथिनोविश्वामित्रःसवितानिचृद्गायत्री॥ ॐभूर्भुवःस्वः ॥ तत्सवि०यात् ॥ त[1]तोग्निमीळेइत्यारभ्य सूक्तमनुवाकमधिकं वायथाशक्तिमन्द्रया वाचा ऋष्यादिपूर्वकं तथा अस्मिन्वलैकेइत्यारभ्यब्राह्मणंचयथाशक्तिप्रत्यहंपठेत् ॥ अनधीतवेदश्चेदाद्यन्तंप्रत्यहंपठेदित्याचारः ॥ * ॥ अग्निंनवमधुच्छन्दाग्निर्गायत्री ॥ ॐअग्निमीळेपुरोहितंयज्ञस्यदेवमृत्विजं ॥ होतारंरत्नधातमं ॥ १ ॥ अग्निःपूर्वेभिर्ऋषिभिरीड्योनूतनैरुत ॥ सदेवाँएहवक्षति ॥ २ ॥ अग्निनारयिमश्नवत्पोषमेवदिवेदिवे ॥ यशसंवीरवत्तमं ॥ ३ ॥ अ

१, तेपछी"अग्निमलि" एऋचाथी आरंभीने सूक्त,अथवा अनुवाक, अथवातेथी,वधारे,शक्तिप्रमाणे धीमाधीमा उच्चारवडे ऋषि,देवता,अनेछंदसहित॥तेमज"अस्मिन्वैलोके"त्यांथीमांडी ब्राह्मण पण शक्ति प्रमाणे हमेश भणवुं॥वेदनभणेलहोय तेणेआदि,अने अंतनु सूक्त,अनेब्राह्मणना प्रथमनो त्था छेवटनो खंड, भणवो एम संप्रदायछे*

ग्नेयंयज्ञमध्वरंविश्वतःपरिभूरसि ॥ सइद्देवेषुगच्छति
॥ ४ ॥ अग्निर्होताकविक्रतुःसत्यश्चित्रश्रवस्तमः ॥ दे
वोदेवेभिरागमत् ॥ ५ ॥ १ ॥ यदंगदाशुषेत्वमग्नेभद्रं
करिष्यसि॥ तवेत्तत्सत्यमंगिरः॥६॥ उपत्वाग्नेदिवेदिवे
दोषावस्तर्धियावयं ॥ नमोभरंतएमसि ॥ ७ ॥ राजं
तमध्वराणांगोपामृतस्यदीदिविं ॥ वर्द्धमानंस्वेदमे
॥ ८ ॥ सनःपितेवसूनवेऽग्नेसूपायनोभव ॥ सचस्वानः
स्वस्तये ॥ ९ ॥ ॥ २ ॥ इत्यादिमंसूक्तं[1] * संसमिदि
तिऋक्चतुष्टयात्मकस्यसूक्तस्यसंवननःप्रथमायाअग्निर
न्यासांसंज्ञानमनुष्टुप्त्रितीयायास्त्रिष्टुप् ॥ संसमिद्युव
सेवृषन्नग्नेविश्वान्यर्यआ ॥ इळस्पदेसमिध्यसेसनोवसू
न्याभर ॥ १ ॥ संगच्छध्वंसंवदध्वंसंवोमनांसिजानतां
॥ देवाभागंयथापूर्वेसंजानानाउपासते ॥ २ ॥ समा
नोमंत्रःसमितिसमानीसमानंमनःसहाचित्तमेषां ॥ स
मानंमंत्रमभिमंत्रयेवःसमानेनवोहविपाजुहोमि ॥ ३ ॥
समानीवआकूतिःसमानाहृदयानिवः ॥ समानमस्तुवो
मनोयथावःसुसहासति॥४ ॥ ४९ ॥ इत्यन्तिमंसूक्तम्[2] *

टी=१. एरीते पेहेलुं सूक्त पुरुं थयुं. *
२. एरीते छेवटनुं सूक्त पुरुं थयुं. *

शंयुर्बार्हस्पत्यो विश्वेदेवा शक्करी ॥ ॐतच्छंयोरावृ
णीमहे गातुं यज्ञाय गातुंयज्ञपतये दैवी स्वस्ति रस्तु
नः स्वस्तिर्मानुषेभ्यः॥ ऊर्द्ध्वं जिगातुभेषजं शन्नोअस्तु
द्विपदेशं चतुष्पदे ॥ १ ॥ ॐनमोब्रह्मणे नमो स्त्वग्नये
नमः पृथिव्यै नम ओषधीभ्यः॥ नमो वाचे नमो वाच
स्पतयेनमोविष्णवेमेहतेकरोमि ॥ २ ॥ * ॐअस्मिन्वै
लोकउभयेदेवमनुष्याआसुस्तेदेवाः स्वर्गंलोकंयंतोग्नि
मूचुस्त्वंन्नोअस्यलोकस्याध्यक्षएधीतितानग्निरुवाचाथय
द्वोहंघोरसंस्पर्शतमोस्म्यनपचायितारोमनुष्याः कथंव
स्तद्भविष्यति यन्मनुष्येष्विति ते देवा ऊचुस्तस्य
वै तेवयं घोरास्तनूर्विनिधास्यामोथैयवते शिवाश
ग्म्यायज्ञिया तनूस्तयेह मनुष्येभ्योभविष्यसीति तस्या
प्सुपवमानामदधुर्वायौपावकामादित्येशुचिमथयैवास्य
शिवाशग्म्या यज्ञिया तनूरासीत्तयेहमनुष्येभ्योतपदे
तावाअग्नेस्तन्वस्तद्यदेतादेवतायजत्यत्राग्निः सांगःसत
नूःप्रतिभवति तावैतिस्रोभवंतित्रयोवाइमेलोकाइमा
नेवतंलोकानाप्नोति पौर्णमासंप्रथमायैतंत्रंभवत्यामावा
स्यंद्वितियायैतेनहास्यदर्शपूर्णमासावन्वारब्धौ भवतई
लितवत्यौहव्यवाड्वत्यौप्रथमायेसंय्याज्येतत्संयाज्यारूपं

द्व्यग्नीद्वितियायद्वाह्मग्नीयजातिसप्तदशसामिधेनीकाद्व
तीयासप्तदशसामिधेनीकावाइष्टिपशुवंधास्तादिष्टिपशु
बंधानाप्नोतिसद्वंतावाज्यभागोभवतोसानीति वाग्नीना
धत्तेस्यामितिकामयतेसयादिहवाअपिस्वैषावीरइवसन्न
ग्नीनाधत्ते क्षिप्रएवसंभवति क्षिप्रेभोग्यतामश्नुतेयः सद्वं
तोकुरुतेविराजोसंयाज्येश्रीर्विराळंनाद्यंश्रियोविराजो
न्नाद्यस्योपाप्त्यै तावैगायत्र्यो भवंति गायत्रोवाअग्निर्गा
यत्रच्छंदा:स्वेनैवतच्छंदसाग्नीनाधत्ते तावाउपांशुभवंति
रेत:सिक्तिर्वा अग्न्याधेयमुपांशुवै रेतः सिच्यतोभिरू
पाभवंति यद्यज्ञेभि रूपंतत्समृद्धं यज्ञस्यैव समृद्ध्यै द्वाद
शदद्याद्द्वादश वैमासाः संवत्सरः संवत्सरस्यैवा प्त्या
अश्वं त्रयोदशं ददातियस्त्रयोदशो मासस्तस्याप्त्यै॥१॥
इत्यादि मःखंडः॥* पंचच्छंदांसि रात्रौ शंसंत्यनुष्टुभं
गायत्रीमुष्णिहं त्रिष्टुभं जगतीमित्येतानि वैरात्रि
श्छंदांसि पंचाहा वारात्रिर्वाजपेयस्य चातिरिक्तोत्थ
मुकस्यातिग्रहोरात्रि श्छंदस श्छंदस एव तदाह्वयं
त इति हस्माह कौषीतकि रजामिताया अथ यत्तिरो
अह्न्यवती त्रिष्टुभमाश्विनोक्थग्रहस्य पुरोनुवाक्या

१. आ पेहेलो खंड पुरोथयो *

मन्वाह तिरोअह्न्यवान्प्रैषस्तिरो अह्न्याहिसोमाभ
वंत्यथोबलंवैवीर्यंत्रिष्टुब्बलमेवतद्वीर्यं यजमानेदधाति
चतुराहावान्याप्तोर्यामस्यातिरिक्तोक्थानि भवंति प
शवोवा उक्थानि चतुष्टयावै पशवोथोचतुष्पादाः प
शूनामेवाप्त्यै क्षेत्रपत्याः परिधानीयाः कुर्वत इयंवै
क्षेत्रं पृथिव्यस्या मदीनायामंततः प्रतिष्ठास्याम इत्य
स्यामेव तददीनायामंततः प्रतितिष्ठत्यथयत्तिरोअ
ह्न्यवत्यस्त्रिष्टुभो याज्या भवंति तिरोअह्न्याहि सो
माभवंत्यथोबलं वैवीर्यं त्रिष्टुब्बलमेव तद्वीर्यं यजमाने
दधत्यनुवषड्कुर्वन्त्याहुतीनामेव शांत्या आहुतीनां प्र
तिष्ठित्या अथहारियोजनेन चरंति तस्योक्तं ब्राह्मणं
त्रिष्टुभं हारियोजनस्य पुरोनुवाक्या मन्वाहतस्या
उक्तं ब्राह्मणमथयदतिप्रैषस्य पुरोनुवाक्यामन्वाहा
वीर्योहवा उसंप्रैषोयोपुरोनुवाक्योथोह्विदेवत्येषु वै पु
रोनुवाक्या भवंति सर्वेषुच प्रस्थितेषु तस्मादस्य पु
रोनुवाक्या मन्वाहाथ यदतिप्रैषमाह परमेवैतदहर
भि वदति परमेवै तदहरभ्यारभ्य वसंतीति हस्माहकौ
षीतकिः परमेवै तदहरभ्या रभ्यवसंतीति हस्माहकौषी

तकिः॥ ११ ॥ इत्यन्तिमः खण्डः॥ समाप्तेपुनः ॥ उँश न्नोमित्रः० क्रमः ॥१॥३॥ उँस्वस्तिनइं० धातु॥२॥ उँसु तासोम० मदाः ॥ १ ॥ ३ ॥ उँइंदुरिंद्रा० जसा ॥ ५ ॥ ४ ॥ उँभूर्भुवस्वः ॥ तत्सं० यात् ॥ ५ ॥ इति पूर्वव त्पठेत् ॥ एवं प्रत्यहं क्रियमाणः समाप्ते वेदे पुनरादित आरभेत ॥ एवं यावज्जीवं प्रत्यंह कुर्यात् ॥ तस्य द्वाव नध्यायौ यदात्माशुचि रशुचिर्यद्देशः इत्याश्वलायन सूत्रादाशौचादौ लोपः ॥ इति ब्रह्मयज्ञप्रयोगः ॥

॥ अथ ब्रह्मयज्ञप्रशंसा ॥

कर्मप्रदीपे ॥ प० ॥ न ब्रह्मयज्ञादधिकोऽस्ति यज्ञोन तत्प्रदानात्परमास्ति दानं॥ सर्वेऽन्तवंतः क्रतवः सदाना

१. आ छेवटनो खंड पुरो थयोसमाप्तिथाय, त्यारे फरीने "शन्नोमित्र वीगेरे, पांचमंत्रोपूर्वनी पठे भणवा. एम हमेश ब्रह्मयज्ञ करतां करतां वेद समाप्त थाय त्यारे फरीने प्रथमथी आरंभ करवो. ॥ एप्रमाणे ज्यांहां सुधी जीवे त्यांहां सुधी रोजरोज करवुं ॥ तेब्रह्मयज्ञना बे अनध्यायछे ज्याहारे शरीर अपवित्र होय अने अपवित्र जगो होय त्याहारे ॥ एम आश्वलायन सूत्रमां छे माटे सुतक वगेरेमां तेनो लोप समजवो ॥ ॥

॥ हवे ब्रह्मयज्ञनी प्रशंसा कहेछे. ॥

कर्मप्रदीपमां ॥ पंचमहायज्ञमां ब्रह्मयज्ञथकी अधिक

मू. नांतोदृष्टः कश्चिदस्य द्विकस्य ॥१॥ गुर्वप्येनोनतं स्पृशेत्पंक्तिंचैव पुनाति सः॥ यं यं क्रतुं च पठति फलभाक्तस्य तस्य च ॥ २ ॥ वसुपूर्णावसुमतीत्रिर्दानफलमाप्नुयात्॥ ब्रह्मयज्ञादपि ब्रह्मदानसेवातिरिच्यते ॥ ३ ॥ इति ॥ तथा ॥ येरिष्ट्वा सततं विप्रः प्राप्नुयात्सद्म शाश्वतमितिच ॥ ४ ॥ इति ब्रह्मयज्ञप्रशंसा ॥

॥ अथतर्पणप्रयोगः ॥

॥ कर्त्ता यज्ञोपवीती प्राङ्मुखोभूत्वा दक्षिणं जान्वाच्य पवित्र पाणि ऋजुदर्भैर्यवैर्देवतीर्थेनोभाभ्यां हस्ताभ्यामे

टी.(मोटो)यज्ञनथी अने वेदना दानथी बीजुं उत्तम दान नथी दानसहीत सर्व यज्ञो नाशवंतछे अने ब्रह्मयज्ञ. तथा वेदना दानो अंतकोइए दीठोनथी मोटुंपाप ॥१॥ पण तेने अडके नही नेते ब्रह्मयज्ञकरनार पंक्तिने पवित्र करेछे ॥ अनेजेजे यज्ञना प्रकरणने भणेछे तेते यज्ञना फलने भोगवेछे ॥ २ ॥ द्रव्यथी पुरेली पृथिवीना त्रणवार दाननुं जे फल पामे ते फल ब्रह्मयज्ञथकी थाय ने ब्रह्मयज्ञथकी पण वेदनुं दान वधतुंछे ॥ ३ ॥ जेपंचमहा यज्ञोवडे हंमेश यजनकरी ने ब्राह्मण ब्रह्म लोकने पामेछे

हवे तर्पणनो प्रयोग कहेछे.

कर्त्ता सव्य जनोइ राखी, उगमणे मोये बेशी, जमणो पगवाली, दर्भनुं पवीत्रुं बे हाथमां पेहेरी, पाधरा दर्भो अने यवे क

मू. कैकाञ्जलिनादेवतास्तर्पयेत् ॥ तद्यथा॥दक्षिणहस्तेजलं गृहीत्वा देशकालौसङ्कीर्त्य " ममोपात्त दुरितक्षयद्वारा श्री परमेश्वर प्रीत्यर्थं देवर्षि पितृ मनुष्यादींस्तर्पयिष्ये "॥इतिसङ्कल्प्ययथासूत्रपठितैर्मन्त्रैर्देवताभ्यःषट्चत्वारिंशदञ्जलीन्दद्यात् * ॥ ॐअग्निस्तृप्यतु ॥१॥ईत्युक्काजलाञ्जलिं जले गृहेचेत्पात्रात्पात्रान्तरे वा क्षिपेत् *॥ ॐवायुस्तृ० ॥२॥ ॐसूर्यस्तृ० ॥ ३ ॥ ॥ ॐविष्णुस्तृ ० ॥ ४ ॥ ॐप्रजापतिस्तृ० ॥ ५ ॥ ॐविरूपाक्षस्तृ० ॥ ३ ॥ ॐसहस्त्राक्षस्तृ० ॥७॥ ॐसोमः ॥ ८ ॥ ॐब्रह्मा ॥ ९ ॥ ॐवेदाः ॥ १० ॥ ॐदेवाः ॥ ११ ॥ ॐऋषयः ॥ १२ ॥ ॐसर्वाणिचछन्दांसि ॥ १३॥ ॐओंकारः ॥ १४ ॥ ॐवषट्कारः ॥ १५ ॥ ॐमहाव्या

टी. री देवतीर्थे (आंगलीओना अग्र भागे करी) बे हाथवडे एक एक अंजलीये देव तर्पण करवुं ॥ ते आ रिते ॥ जमणा हाथमां जल लइ पत्र २० ना टीप्पणमां लख्या मुजब देश कालनुं कीर्तन (संकल्प) करी " ममोपात्त०तर्पयिष्ये " ए रीते संकल्प करी जेम सूत्रमां भण्याछे ते प्रमाणेना मंत्रो वडे देवताओने छेतालीश अंजलि आपवी*

१. एरीते बोली नदी वीगेरे ए जलमां अने घरमां तर्पण करे तो एकपात्रमांथी बीजा पात्रमां ते जलनो अंजलि नाखवो.

मू. हृतयः ॥१६॥ ॐसावित्री ॥१७॥ ॐयज्ञाः ॥ १८॥
ॐद्यावापृथिवी॥ १९ ॥ ॐनक्षत्राणि ॥ २० ॥ ॐअन्त
रिक्षम् ॥ २१ ॥ ॐअहोरात्राणि ॥ २२ ॥ ॐसंख्या ॥
॥२३॥ ॐसंध्या ॥ २४॥ ॐसमुद्राः ॥२५ ॥ ॐनद्यः
॥२६ ॥ ॐगिरयः ॥ २७ ॥ ॐक्षेत्रौषधिवनस्पतिगन्ध
र्वाप्सरसः ॥ २८ ॥ ॐनागाः ॥ २९ ॥ ॐवयांसि ॥
॥३०॥ ॐसिद्धाः ॥ ३१ ॥ ॐसाध्याः ॥ ३२ ॥ ॐविप्रा
: ॥ ३३ ॥ ॐयक्षाः ॥ ३४ ॥ ॐरक्षांसि ॥ ३५ ॥ ॐभू
तान्येवमंतानितृप्यन्तु ॥ ३६॥ ॐश्रुतिंतर्पयामि ॥ ६ ॥
॥७॥ ॐस्मृतिंत० ॥ ३८ ॥ ॐधृतिंत० ॥ ३९ ॥ ॐर
तिंत० ॥ ४० ॥ ॐगतिंत० ॥ ४१ ॥ ॐमतिंत० ॥ ४
२ ॥ ॐश्रद्धामेधे ॥ ४३ ॥ ॐधारणांच ॥ ४४ ॥ ॐगो
ब्राह्मणान् ॥ ४५ ॥ ॐस्थावरजङ्गमानिसर्वभूतानितृ
प्यन्तु ॥ ४६ ॥ इतिदत्वा ॥ ततःप्राचीनावीतीआग्ने
य्यभिमुखः सव्यंजान्वाच्य द्विगुणदर्भैस्तिलैः पितृती

टी. १ ए प्रमाणे अंजलि आपी ते पछी जनोइ अपसव्य राखी अग्निकोण सामासुखे बेशी डावो पगवाली बेवडा दर्भो अने तिलवडे*पितृतीर्थे (अंगोठा अने तेनी पासेनी आंगलीना

*(ते तिल लेवानो विधिएबोछे के मातापिताना सांवत्सरिकना अने माहालय,श्राद्धना दिवसे गयाजीमां, पर्वणीना दिवसे, अने तीर्थादिक (पुष्कर वीगेरे) मां तिल लेव,

थैनेकैकमंजलिमृष्यादिभ्योदद्यात् * ॐशतार्चिनः ॥ १ ॥ ॐमाध्यमाः ॥२ ॥ ॐगृत्समदः ॥ ३ ॥ ॐविश्वामित्रः ॥ ४ ॥ ॐजमदग्निः ॥ ५ ॥ ॐवामदेवः ॥ ६ ॥ ॐअत्रिः ॥ ७ ॥ ॐभरद्वाजः ॥ ८ ॥ ॐवसिष्ठः ॥ ९ ॥ ॐप्रगाथाः ॥ १० ॥ ॐपावमानाः ॥ ११ ॥ ॐक्षुद्रसूक्तमहासूक्ताः ॥ १२ ॥ ॐसुमंतुः ॥ १३ ॥ ॐजैमिनिवैशंपायनपैलसूत्रभाष्यगार्ग्यबभ्रुवाभ्रव्यमण्डुमाण्डव्याः ॥ १४ ॥ ॐगार्गी ॥ १५ ॥ ॐवाचक्नवी ॥ १६ ॥ ॐवडवा ॥ १७ ॥ ॐप्रातिथेयी ॥ १८ ॥ ॐसुलभा १९ ॥ ॐमैत्रेयी ॥ २० ॥ ॐकहोलं ॥ २१ ॥ ॐकौषीतार्किं ॥ २२ ॥ ॐमहाकौषीतार्किं ॥ २३ ॥ ॐसुयज्ञं ॥ २४ ॥ ॐशाङ्खायनं ॥ २५ ॥ ॐआश्वलायनं ॥ २६ ॥ ॐऐतरेयं ॥ २७ ॥ ॐमहैतरेयं ॥ २८ ॥ ॐभारद्वाजं ॥२९॥ ॐजातूकर्ण्यं ॥३०॥ ॐपैंग्यं ॥ ३१ ॥ ॐमहापैंग्यं ३२॥

टी. वचलाभागे) एक एक अंजाळि ऋष्यादिकोने आपवो *

निषेधनथी, पण ते सिवाय रवि, मंगळ अने शुक्रवार तथा मघा नक्षत्र, रात्रि, पडवो, छठ, सातम, अगीयारश, अने तेरश ए तिथिओ, पोतानो जन्म दिवस, उदय तथा अस्तवखत, विवाह, जनोइ, चौल, अने नांदीश्राद्धनीपछी, अनुक्रमे एक वर्ष, छमास, त्रणमास, अने एकमास, एटलां दिवस वर्जीने तीर्थे जमणा पोहोंचा उपर तिलराखी डावा हाथ वडे प्रति त्रांबे लेता जइ अने घेर तर्पणना पात्रमां तिळ नाखी तर्पण करवुं ॥)

मृ. ॥ ॐवाष्कलं ॥ ३३ ॥ ॐगार्ग्यं ॥ ३४ ॥ ॐशाकल्यं ॥ ३५ ॥ ॐमांडूकेयं ॥ ३६ ॥ ॐमहादमन्नं ॥३७॥ ॐआदवाहिं ॥ ३८ ॥ ॐमहौदवाहिं ॥ ३९ ॥ ॐसौयामिं ॥ ४० ॥ ॐशौनकिं ॥ ४१ ॥ ॐशाकपूर्णिं ॥ ४२ ॥ ॐगौतमं ॥ ४३ ॥ ॐयेचान्ये आचार्यास्ते सर्वेतृप्यंतु ॥४४॥ इति चतुश्चत्वारिंशदंजलीन्दत्वा स्वीयान्पितॄनृपिवत्तर्पयेत् १॥ अदोगोत्रःअस्मत्पिता अदोदः शर्मातृप्यतु।एवंत्रिः॥३॥अदोगोत्रःअस्मत्पितामहःअदोदःशर्मातृप्यतु॥३ ॥ अदोगोत्रःअस्मत्प्रपितामहःअदोदःशर्मातृप्यतु॥३॥अदोगोत्रा अस्मन्माता अदोदा तृप्यतु॥३॥ अदोगोत्रा अस्मत्पितामही अदोदातृप्यतु॥३॥ अदोगोत्रा अस्मत्प्रपितामही अदोदातृप्यतु ॥ ३ ॥ अदोगोत्रा अस्मत्सापत्नमाताअदोदातृप्यतु ॥ ३ ॥ अदोगोत्रः अस्मन्मातामहः अदोदःशर्मासपत्नीकस्तृप्यतु ॥ ३ ॥ अदोगोत्रः अस्मत्प्रमातामहः अदोदःशर्मासपत्नीकस्तृप्यतु ॥ ३ ॥ अदोगोत्रःअस्मद्वृद्धप्रमा

---

१ ए रीते चुंमालीश अंजलि आपी पोताना पितृओने ऋषिनी पठे तर्पण करे॥ आ पित्रादिना तर्पणमां " अदः " ए शब्दनी जगोये गोत्र, संबंध, अने शर्म, जे होय ते केहेवां एम दरनामे त्रण त्रण वार अंजलि आपवो ॥

मू. तामहः अदोदः शर्मासपत्नीकस्तृप्यतु॥३॥ पित्रादि मातामहांतानांतुत्रयोंजलयः *॥ अदोगोत्राअस्मत्पत्नी अदोदातृप्यतु ॥१॥ अदोगोत्रः अस्मत्तनयः अदोदः शर्मातृप्यतु ॥ १ ॥ अदोगोत्रा अस्मत्तनयाअदोदातृप्यतु ॥ १ ॥ अदोगोत्रः अस्मत्पितृव्यः अदोदःशर्मा सपत्नीकस्तृप्यतु ॥ १ ॥ अदोगोत्रः अस्मन्मातुलः अदोदः सपत्नीकस्तृप्यतु॥ १ ॥ अदोगोत्रः अस्मभ्द्राता अदोदः शर्मा सपत्नीकस्तृप्यतु ॥ १ ॥ अदोगोत्रा अस्मत्पितृष्वसा अदोदा सापत्या सधवा तृप्यतु ॥ १ ॥अदोगोत्रा अस्मन्मातृष्वसा अदोदा सापत्या सधवा तृप्यतु ॥ १ ॥ अदोगोत्रा अस्मत्स्वसा अदोदा सापत्या सधवा तृप्यतु ॥ १ ॥ अदोगोत्रः अस्मच्छ्वशूरः अदोदः शर्मा स॰कस्तृप्यतु ॥१॥ अदोगोत्रः अस्मद्गुरुः अदोदः शर्मा तृप्यतु ॥१॥अदोगोत्रः अस्मच्छिष्यः अदोदः शर्मा तृप्यतु ॥ १ ॥ अदोगोत्रः अस्मदासः अदोदः शर्मा तप्यतु ॥ १ ॥ ऐतेषां पत्न्यादीनामेकैकांजलिः ॥ ततः ॥ अग्निदग्धाश्चये जीवा येऽप्य

टी१. पिताथी मांडी वृद्ध प्रमातामह सुधीनाने त्रण त्रणअंजलि २ आ स्त्री वीगेरेने एक एक अंजली समजवो ॥ ते पछी ॥

मू. दग्धाः कुले मम ॥ भूमौ दत्तेन तोयेन तृप्ता यान्तु प रांगतिं" ॥१॥ इत्येकमंजलिं तटे दत्वा ॥ ॐपितृवंशस्तृप्यतु ॥ ॐमातृवंशस्तृप्यतु ॥ इत्यंजलिद्वयं दद्यात् ॥ एतान्पितॄंस्तर्पयित्वा मनुष्यांस्तर्पयेत् ॥ देवपितृनरेभ्योदद्येति पितृदानोत्तरं मनुष्यदानदर्शनात् ॥ तच्च नीवीतिनोदङ्मुखेन प्रजापतितीर्थेन कार्यं*॥ ॐसनकस्तृप्यतु ॥ २ ॥ ॐसनंदनस्तृप्यतु ॥ २ ॥ ॐसनातनस्तृप्यतु ॥ २ ॥ ॐकपिलस्तृप्यतु ॥ २ ॥ ॐआसुरिस्तृप्यतु ॥ २ ॥ ॐवोढुस्तृप्यतु ॥ २ ॥ ॐपंचशिखस्तृप्यतु ॥ २ ॥ मनुष्येभ्योद्वौद्वावञ्जली ॥ ततोयज्ञोपवीती ॥ "यन्मया दूषितं तीयं शारीरमलसंभवात् ॥ तद्दोषपरिहारार्थं यक्ष्माणं तर्पयाम्यहं" ॥ इत्येकमंजलिं त

टी. "अग्नि दग्धा० गतिं ॥" ए रीते एक अंजलि कांठे आपी ॥ "पितृ० तु ॥ मातृ० तु" ॥ ए रिते बे अंजली आपवा आ पितृओने तृप्त करी मनुष्य तर्पण करवुं ॥ देव पितृ अने मनुष्यने दइने ए रीते पितृ तर्पण करी मनुष्य तर्पण करवुं एम जणायछे ते मनुष्य तर्पण जनोइ कंठय राखी उत्तर सामा मोये प्रजापतितीर्थे (छेवटनी आंगलीओना मूलवडे) करवुं* १ मनुष्योने बबे अंजलि आपवा । ते पछी जनोइ सव्य राखी ॥ "यन्मया० म्यहं" ॥ इमंत्रे कांठे एक अंजलि आपी ज

टे दत्वा नीवीती प्राचीनावीती वा स्नानवस्त्रं तीरे निष्पीडयेत् ॥ तत्र मंत्रः॥प०॥ये चास्माकं कुले जाता अपुत्रा गोत्रिणोमृताः॥ ते गृह्णंतु मया दत्तं वस्त्रनिष्पीडनोदक मिति *॥इदं वस्त्रनिष्पीडन मंत्रस्नानांगतर्पणं नित्यतर्पणं चोभयं कर्त्तव्यं भवति तदा नित्यतर्पणोत्तरमेव कार्यं न स्नानांगतर्पणोत्तरं ॥ इदं गृहे निषिद्धं ॥ ततोयज्ञोपवीत्याचम्यहस्तस्थितदर्भांस्त्यक्त्वा अनेनकर्मणाकृतेनश्रीपरमेश्वरः प्रीयतां ॥ एवं तर्पणं कृत्वा गृहमागत्य वैश्वदेवं कुर्यात्॥ इति नित्यतर्पणम्॥ (अथ तर्पण प्रशंसा अकरणे दोषश्चकर्मप्रदीपे॥)प० छायांयथेच्छेच्छरदातपार्त्तः पयःपिपासुः क्षुधितोऽन्नं

टी० जनोइ कंठय अथवा अपसव्य राखी नाहेला वस्त्रने काठे नचोववुं तेमां मंत्र " येचा० दकं " स्नानांगतर्पण अने नित्यतर्पण बे करवां होय त्यारे नित्यतर्पण पछीज आ वस्त्र नचोववुं स्नानांगततर्पण पछी नहि आ वस्त्र नचोववुं घर आगल निषेधछे ॥ पछी जनोइ सव्य राखी आचमन लइ हाथमां रहेला दर्भो काढी नांखवा ए रीते तर्पण करी घर आगल आवी वैश्वदेव करवो ॥ ए रीते नित्यतर्पण पुरु थयुं १ हवे तर्पणनी प्रशंसा अने ते न करवामां दोषकर्मप्रदीपमां कहेछे.

शरद् ऋतुना तडकाथी तपेलो जेम छायाने, तरशो पाणी

मू.॥ बालोजनित्रीं जननी च बालं योषित्पुमांसं पुरुषश्चयोषां ॥१॥ तथा सर्वाणि भूतानि स्थावराणि चराणि च॥ विप्रादुदकमिच्छन्ति सर्वाभ्युदयकृद्धि सः॥२॥ तस्मात्सदैव कर्त्तव्यमकुर्वन्महतैनसा ॥. युज्यते ब्राह्मणः कुर्वन्विश्वमेतद्बिभर्त्ति हि ॥ ३॥ इति ॥पुराणसमुच्चये ॥ देवताश्चमुनींश्चैवपितृभ्योहिनतर्पयेत् ॥ देवादीनामृणीभूत्वा नरकं स व्रजेदथ * ॥ इति ॥ माध्यन्दिनीयत्रिकाण्डिकासूत्रे ॥ यावज्जीवकृतं पापंतत्क्षणादेवनश्यति ॥इति॥ अतर्पिता देहाद्रुधिरं पिबन्तीतिवच

टी. ने, भुख्यो परिपूर्ण अन्नने बालक माने,मा बालकने, स्त्री पुरुषने अने पुरुष स्त्रीने, इछेछे॥ १ ॥ तेम स्थावर (अचल) अनेचर (गतिवाळा) सर्व प्राणिओ ब्राह्मणथी उदकने इछेछे कारण के ते ब्राह्मण सर्वनो उदय करनारोछे ॥ २ ॥ ते माटे हमेशां तर्पण करवुं ने न करे तो मोटा पाप युक्त थायछे जेथी तर्पण करनारो ब्राह्मण विश्वनुं पोषण करेछे॥३॥ पुराण समुच्चयमां ॥ जे ब्राह्मण देव, मनुष्य, अने पितृने तृप्त न करे, ते देव विगेरेनो करजदार थइ नरकने पामेछे ॥ माध्यंदिनीय त्रिकांडिकासूत्रमां ॥ जीवीत पर्यंत करेलुं पाप (जन्मथी तर्पण कर्यांना दीवस सुधीनुं) तर्पणथी तेज वखते नाश पामेछे ॥ तर्पण न करेला देवो शरीरमांथी रुधिर पीयेछे " एरीतनुं वचनछे माटे आ तर्पण बाप जीवतो होय तेणे पण

मू. नादीतिच ॥ एतत्तर्पणं जीवत्पितृकेणापि देवर्षितर्पणं ॥ "ये चान्ये आचार्यास्तेसर्वे तृप्यन्तु" ॥ इत्यन्तं यवैरेव प्रत्यहमवश्यं कार्यं ॥ अपसव्यं तुद्याप्रकोष्ठात्कर्तव्यम् ॥ 'जीवत्पितृकोप्येतान्' ॥ इति त्रिकाण्डिकासूत्रोक्तेः ॥ इतिजीवत्पितृकस्य तर्पणविधिः ॥ इति चतुर्थभागकृत्यं ॥

॥ अथ पञ्चमभागकृत्यम् ॥

॥ तत्राऽऽप० ॥ चत्वारः पाकयज्ञाः स्युर्ब्रह्मयज्ञश्चपञ्चमः ॥ एते पञ्चमहायज्ञाः प्रत्यहंसूतकादृते ॥ इतिकारिकाकारोक्त्यादिमेयज्ञाः प्रत्यहमनुष्ठेयाः ॥ तेषुब्रह्मयज्ञउक्तः ॥ चत्वारोवैश्वदेवाख्ये कर्मणिसंभवन्ति ॥ तस्मात्तउच्यंते ॥

टी. देव अने ऋषिनुं तर्पण "येचान्येआचार्यास्तेसर्वे तृप्यंतु" त्यांसुधी यववडेज हमेश अवश्य करवुं ॥ तेमां अपसव्य कांडा सुधी करवुं "बाप जीवतो होय ते पण आ देव अने ऋषिनुं तर्पण करे" एम त्रिकांडिकासूत्रमां कह्युछे माटे ॥ एरीते जीवत पितृना तर्पणनो विधिपुरो थयो. एरीते दिवसना चोथाभागनुं कृत्य पुरुंथयुं. ॥

॥ हवे दिवसना पांचमाभागनुं कृत्य कहेछे ॥

तेमां देव, भूत, पितृ, अने मनुष्य ए चार यज्ञोछे अने ब्रह्मयज्ञ पांचमोछे ॥ ए पांच महायज्ञो सूतक शिवाय रोज करवा ॥ ए रीते कारिकाकारे कह्युंछे, माटे ए पांच यज्ञो रोज करवा ॥ तेओमां ब्रह्मयज्ञ प्रथम कह्यो ॥ अने बाकीना चार वैश्वदेव नामना कर्ममां संभवेछे ॥ माटे तेकर्म कहिये छैये ॥

॥ अथ निरग्निकवैश्वदेवविधिः ॥

मू. स तुस्मार्तसूत्रे नोक्तः परंतु ॥ प.॥ कण्डनी पेषिणी चुल्ली ऊदकुंभ उपस्करः ॥ एतेषां पावनार्थाय पञ्चयज्ञाः प्रकीर्तिताः *इत्यनेनावश्यकतयोक्त्वाच्छङ्खवसिष्ठव्यासशाकलस्मृत्यादिवाक्याच्च ॥ अपिच कारिकाकारेणापि शाकलमंत्रादिना वैश्वदेवः कर्तव्यः इत्युक्त्वादावश्यकः ॥ ते शाकलमन्त्रास्तु श्रीमच्छाङ्खायनाचार्येण श्रौतसूत्रे ॥ "पंच पंचशकलान्यादधते" ॥ इतिखण्डेउक्त्वात्तदनुसारेण प्रयोगोऽभिहितः ॥

टी. ॥ हवे निरग्निक (स्मार्तवगरना) ना वैश्वदेवनो विधिकहेछे ॥

ते विधि स्मार्तसूत्रमां कह्यो नथी परंतु ॥ खांडणीयो, घंटी, चुलो पाणिनां ठामो, अने सुपडा वीगेरे, एटलाथी थएला दोषोनी शुद्धिमाटे पांचयज्ञो कह्याछे ॥ एरीतना आवाक्यवडे तेनुं अवश्यपणाये कह्युंछे अने शंख, वसिष्ठ, व्यास, अने शाकल एटलाओनि स्मृति विगेरेनुं वाक्यपणछे, माटे, अने कारिकाकारे पण शाकल मंत्र वीगेरेथी वैश्वदेव करवो एम कह्युंछे तेथी अवश्य जाणवो ॥ ते शाकल मंत्रो श्रीमच्छांखायना चार्ये श्रौतसूत्रमां ॥ " पंचपंच शाकलन्यादधते " एखंडमां कह्याछे. माटे तेना अनुसारे प्रयोग कह्योछे.

म्. सतु सायंप्रातर्द्विवारः कार्यः ॥ तदाह शाङ्खायनः॥ वैश्वदेवमुक्त्वा ॥ ५० ॥ वैश्वदेवमिमं ये तु सायंप्रातः प्रकुर्वते ॥ ते अर्थैरायुषा कीर्त्या प्रजाभिश्चसमृध्नुयुः ॥ इति ॥ आश्वलायनः ॥ वैश्वदेवौ दिवा नक्तं नभवेतां पृथक्पृथक् ॥ प्रातरेवद्विरावृत्या कुर्याद्वा सहितौ द्विजः ॥ इति ॥ कर्मप्रदीपे ॥ पंचानामथ सत्राणां महतामुच्यते विधिः ॥ यैरिष्ट्वा सततं विप्रः प्राप्नुयात्सद्म शाश्वतं ॥इति॥ शाश्वतमविनाशि सद्म स्थानं प्राप्नुयात् ॥ ब्रह्मलोकमित्यर्थः ॥ इति तद्व्याख्याकारैरुक्तं ॥ अकरणे दोषमाहशातातपः ॥ वैश्वदेवः प्रकर्तव्यः पं

तेवैश्वदेव तो राते अने दीवसे बेवार करवो॥ तेनु वाक्य शांखायन कहेछे ॥ वैश्वदेव कह्यापछी ॥ जे ब्राह्मण सायं अने प्रातः (राते अने दीवसे) आ वैश्वदेव करेछे तेअर्थ आयुष्य कीर्ति अने प्रजावडे समृद्धिवाला थायछे ॥ अश्वलायन कहेछे के दिवसे अने राते जो जुदो जुदो वैश्वदेव न थाय तो दिवसेज बेआवृत्तिए वातंत्रे ब्राह्मणे करवो ॥ कर्मप्रदीपमां ॥ हवे मोहोटा पांच यज्ञनो विधी कहेछे ॥ जे यज्ञोवडे यजन करी ब्राह्मण अविनाशिस्थान (ब्रह्मलोक) ने पामेछे ॥ एरीते ते कर्मप्रदीपना व्याख्याकारे (शिवरामे) कह्युंछे ॥ हवे ते न करवामां दोष शातातपकेहछे॥ पांच हिंसाना दोषनी निवृत्तिसारु वैश्वदेव करवो कारणके पांचदोषो ग्रहस्थना घरमां रोजरोज

मू.-चलनाऽपनुत्तये॥ पंचसूनागृहस्थस्य वर्त्ततेऽहरहःस
दा ॥ कण्डिनी पेषिणी चुल्ली उदकुंभश्चमार्जनी॥ पंच
सूना गृहस्थस्य ताभिः स्वर्गं न विन्दति इति ॥ क
र्मदीपे ॥ सायं प्रातर्वैश्वदेवः कर्त्तव्योबलिकर्म च ॥ अ
नश्नताऽपि सततमन्यथा किल्विषी भवेत् इति ॥ स
तु ॥ अस्नात्वाशी मलं भुंक्ते अजप्त्वा पूयशोणितं ॥
अहुत्वैवकृमीन्कीटानदत्त्वाश्वशकृत्तथा ॥ इति पराशर
वाक्याद्भोजनार्थं स्नात्वा कार्यः॥ तथा चाचारार्के व्या
सः॥ होमान्नदानरहितं न भोक्तव्यं कदाचन ॥ अकृत्वा
पञ्चयज्ञांस्तु भुक्त्वा चान्द्रायणं चरेत् * ॥ यदि दैवात्प्रा

टी. कायम थायछे । ते दोषो खांडणीयो, घंटी, चुलो,
पाणीनाठामो अने सावरणीथी थायछे. अने तेणेकरी स्वर्ग
पामतो नथी ॥ कर्मप्रदीपमां ॥ राते अने दिवसे वैश्वदेव अ
ने बलीदाननु कर्म नजमनाराये पण रोज करवुं ने न करे
तो ते पापी थायछे ॥ ते वैश्वदेवतो ॥ नाया वगर जमेतो ते
वीष्टा, खायछे. ने गायत्रीनाजपवगर जमेतो परु, अने लोहीने,
वैश्वदेव वगर जमेतो कृमी, अने कीडा, अने दानवगर जमेतो
छाणने खायछे. एरीते पराशरनु वाक्यछे. माटे जमवा सारु
नाहिने करवो ॥ ते प्रमाणे आचारर्कमां॥वैश्वदेवअने अन्नदान
वगर कोइ वखत जमवुं नही ॥ अने पांच यज्ञो न करी जमे
तोते पछी चांद्रायण नामनु प्रायश्चित करे ॥ जो दैवयोगथी

मू. तर्मध्यान्हिकं स्वे कालेन भवतिचेद्गौणकालेऽपिकार्यं ॥ गौणकालेप्यसंभवे यमः प० ॥ ॥ दिवोदितानि कर्माणि प्रमादादकृतानि चेत् ॥ शर्वर्याः प्रथमे यामे तावत्कुर्याद्यथा क्रमं ॥ अत्र मुख्यकालानुरोधात्सायंसंध्योपासनमादौकृत्वाऽऽगन्तूनामंते निवेशः ॥ इति न्याये नातीतकालं प्रातर्माध्याह्निकं पश्चात्कार्यमितिन्यायतः प्राप्तं तस्यानिषेधार्थं यथाक्रममितिवचनं ॥ सर्वथासन्ध्यालोपे प्रतिसन्ध्यमेकोपवासस्तत्प्रातिनिधिभूतमेकं ब्राह्मणभोजनं वाऽयुतमष्टोत्तरसहस्रमत्यशक्तःशतंगाय

टी. प्रातःकालनु. अने मध्याह्ननुंकर्म पोताना कहेलाकाले नथायतो तेपछी नाकाळेपण करवुं तेमांपण न बनेतो ते बाबत यम कहेछे ॥ दिवसमां कहेला कर्मो प्रमादथी (उद्धताइथी) न कर्याहोयतो रात्रिना पेहेलां पोहोरसुधीमां अनुक्रमे करवां ॥ आठेकाणे मुख्यकाल (सायंसंध्या) नो रोध न थाय माटे सायं संध्यानु उपासन प्रथम करी रहेलां कर्मोनो अंते समावेश करवो ए न्यायेकरी रहिगयेलां प्रातःकाल अने मध्यान्हकालनां कर्मोपछो करवा एम न्यायथकी प्राप्तथयुं तेनानिषेधने सारु "यथाक्रमं" एवाक्यछे माटे अनुक्रम प्रमाणे करवां ॥ सर्व प्रकारे संध्यानो लोपथायतो दरेक संध्याये एक उपवास अथवा ते निमित एक ब्राह्मण भोजन अथवा दस हजार १०००० अथवा एकहजार आठ १००८ ने घणी अशक्ति

मू. त्र्याजपोवा ॥ द्व्यहंत्र्यहं लोपे तदावृत्तिः ॥ ततः परं मयुतस्यैकं कृच्छ्रमिति रीत्या कल्प्यम् ॥ कृच्छ्रप्रत्याम्नाया स्त्वन्यतोऽवगन्तव्याः

॥ अथ प्रयोगः ॥

कर्त्ता स्नात्वा प्राङ्मुखः पीठादावुपविश्य ॥ पवित्रपाणिःकुशोपग्रहोदक्षिणहस्ते जलं गृहीत्वा ॥ मासपक्षाद्युल्लेखनान्ते ॥"ममपंचसूनाजनितप्रत्यवाययरिहारपूर्वकाऽऽत्मसंस्कारार्थमन्नसंस्कारार्थंचशाकल्होमविधिनाप्रातःसायंवैश्वदेवाख्यं कर्म तन्त्रेणाहंकरिष्ये" इति सङ्कल्प्यकर्माङ्गमाचम्य ॥ कुण्डेवास्थंडिलेपंचभू

टी. होयतो सो १०० गायत्रीनो जपकरवो ॥ बे वा त्रण दीवस लोपथयो होयतो तेटली संख्या वधारवी, तेपछी वधारे दीवस लोपथायतो. गायत्रीनी संख्याकरी दसहजारे एक कृच्छ्र कल्पवुं. तेकृच्छ्रना मौल्यवीगेरेना पक्षो अन्य ग्रंथ (धर्मसिंधु वीगेरे) थी जाणवा ॥

॥ हवे वैश्वदेवनो प्रयोग कहेछे ॥

कर्त्ता नाही पुरव सामामुखे पाटला वीगेरे उपर वेशी दर्भनुं पवित्रुंजमणा हाथमां राखी पचीश २५ दर्भनो उपग्रह डाबाहाथमां राखी जमणा हाथमां पाणि लइ पत्र २०ना टीप्पण मुजब मास तथा पक्षनो उच्चारकरी 'ममपं०च्ष्ये' एरीते संकल्पकरी आचमन लइ कुंडमां अथवा स्थंडिल उपर पांच भूमिना संस्का

मू॰संकारान्कुर्यात् ॥तेयथा॥तद्दर्भैःसंमृज्य॥१॥ जलमिश्रगोमयेनोपलिप्य ॥ २ ॥ यज्ञियकाष्ठेनतन्मध्याद्दपरे दक्षिणोपक्रमामुदक्संस्थामेकां रेखां प्रादशमितां कृत्वा तस्याउपरितावन्मात्रां दक्षिणतोमध्येउत्तरतश्च कुर्यात् ॥ ३ ॥ ताभ्योरेखाभ्यएकशोंगुष्ठानामिकाभ्यां क्रमेण पांसून्परिगृह्य प्राञ्चं प्रक्षिपेत् ॥ ४ ॥ ततस्तन्त्रेण ता अभ्युक्षेत् ॥ ५ ॥ ततस्तैजसादिपात्रेण विहितं निर्धूममग्निमानीय ॥ तत्राग्निंप्रणयामीति मंत्रेण तूष्णीं वा स्वाभिमुखं लौकिकाग्निंस्थापयेत् * ॥

टी. र करवा ॥ते आरीते॥ ते कुंड अथवा स्थंडिलने दर्भोवडे संमार्जन (वाळीने साफ) करी ॥ १ ॥ जलमिश्रित गायनां छाणवडे लीपो ॥ २ ॥ दर्भवीगेरे यज्ञोपयोगी काष्ठवडे ते कुंडना मध्यथी पछवाडे दक्षणथीमाडी उत्तरमां जायतेम एक रेखा प्रादेश (दसआंगल) ना प्रमाणनी करी तेनाउपर तेटला प्रमाणनी ते रेखाथीमांडी पूर्वमां जायतेम दक्षिणमां वचमां अने उत्तरमां एरीते त्रणरेखा करवी ॥ ३ ॥ ते चारे रेखामांथी एक एकमांथी अंगोठो अने त्रीजी आगली एबेना अग्रवडे करेली रेखामानी अनुक्रमे धुळनेलइ पूर्वमां नाखवी ॥४॥ ते पछी ते रेखाने एकसाथे उंधाहाथे पांणी वडेछांटवी ॥ ५ ॥ ते पछी कांसावीगेरेना पात्रवडे धाकनो धुवाडावगरनो अग्निलावी ते कुंडमां "अग्निंप्रणयामि॰चतुष्पदे" एमंत्रे अथवा मंत्रवगर पोतानी सामुपात्र रेहे तेम लौकिक अग्निनुं स्थापन करवुं *

ॐअग्निं प्रणयामि मनसा शिवेनायमस्तु संगमनोवसूनां मानोहिंसीःस्थविरं माकुमारंशन्नोभवद्विपदेशंचतुष्पदे ॥ १ ॥ ततश्चत्वारिशृंगेति ध्यायेत् ॥ वामदेवोगौतमोग्निस्त्रिष्टुप् ॥ अग्निध्याने विनियोगः ॥ ॐचत्वारि शृंगात्रयोअस्य पादा द्वेशीर्षे सप्तहस्तासोअस्य ॥ त्रिधा बद्धोवृषभोरोरवीति महोदेवोमर्त्यां आविवेश ॥ १ ॥ ततः " पावकनाम्ने वैश्वानराय नमः " ॥ इति गन्धाद्युपचारैः संपूजयेत् ॥ ततोवैश्वानरस्येति तिसृभिरृग्भिःसंस्तूय मंत्रेण नमस्कुर्यात् ॥ कुशआङ्गि रसोवैश्वानरोग्निस्त्रिष्टुप् ॥ अग्निस्तुतौविनियोगः ॥ ॐवैश्वानरस्यसुमतौस्यामराजाहिकंभुवनानामभिश्रीः । इतोजातोविश्वमिदंविचष्टेवैश्वानरोयततेसूर्येण ॥ १ ॥ पृष्ठोदिविपृष्ठोअग्निःपृथिव्यांपृष्ठोविश्वाओषधीराविवे

टी. १ ते पछी " चत्वारि शृंगा०आविवेश " एमंत्रे अग्निनुं ध्यान करवुं ॥

२. ते ध्यान कर्यापछी " पावकनाम्ने वैश्वानरायनमः " एम बोली अग्निनुं गंध वीगेरे उपचार वडे पूजन करवुं ॥ ते पछी " वैश्वानरस्य० उतद्यौः " ए त्रण रुचा वडे अग्निनुं स्तवन.(स्तुति) करी ते पछीना " मुखंयः०त्मने " आमंत्र वडे नमस्कार करवो. ॥

श॥ वैश्वानरःसहसाष्टष्ठोअग्निःसनोदिवासरिषःपातुन
क्तं ॥२॥ वैश्वानरतवतत्सत्यमस्त्वस्मान्रायोमघवानःस
चंतां॥ तन्नोमित्रोवरुणोमामहंतामदितिःसिंधुःपृथिवीउ
तद्यौः ॥३॥प॰॥ मुखं यः सर्वदेवानां हव्यभुक्कव्यभुक्तथा
॥पितृणां च नमस्तस्मै विष्णवे पावकात्मने*॥ततस्त्रिः
परिसमुह्य ॥ त्रिःपर्युक्ष्य ॥ दक्षिणं जान्वाच्य ॥ सुस
मिद्धेऽग्नावेकां समिधमाधायैकस्मिन्पात्रे सघृतमोदन
मादाय देवतीर्थेनैकादशाहुतीर्जुहुयात् * ॐभूःस्वाहा
इदमग्नयेनमम ॥ १ ॥ ॐभुवःस्वाहा ॥ इदंवायवेनमम
॥ २ ॥ ॐस्वःस्वाहा ॥ इदं सूर्याय नमम ॥ ३ ॥ ॐ
भूर्भुवःस्वःस्वाहा ॥ इदं प्रजापतये ममन ॥ ४ ॥ ॐ

टी. १ ते पछी त्रणवार परिसमूहन (कुंड अथवा स्थंडिलनी फरतुं कोर उपर ईशान कोणाथी मांडी ईशान कोणा सुधी त्रणवार जल फेरवी ने पाछो खाली हाथ अवलो ईशान कोणा सुधी लेवो). करी जमणा हाथमां पाणि लेइ ईशान कोणेथी मांडि फरती ईशान कोणा सुधी त्रणवार धारा करी उपर मुजब अवलो हाथ लेइ जमणो पग वाली प्रदिप्त थयेला अग्निमां एक समिध (दस आंगलनुं खाखरानुं अथवा तेटला आंगलना त्रण दर्भना कटका) होमी एक पात्रमां घीइ सहित चोखा लइ देव तीर्थ (आंगलीओ तथा अंगोठाना अग्र) वडे अगियार ११ आहुति अग्निमां होमवी ॥ * ॥

आत्मकृतस्यैनसोवयजनमसि स्वाहा॥इदमग्नये नमम
॥ ५ ॥ ॐमनुष्यकृतस्यैनसोवयजनमसि स्वाहा ॥ इदं
म०म ॥ ६ ॥ ॐपितृकृतस्यैनसोवयजनमसि स्वाहा॥
इदम०म ॥७॥ ॐदेवकृतस्यैनसोवयजनमसिस्वाहा॥
इदम०म ॥८॥ ॐयच्चाहमेनोविद्वांश्चकार यच्चाविद्वांस्त
स्य सर्वस्यैनसोवयजनमसि स्वाहा ॥ इदम०म ॥९॥
ॐप्रजापतयेस्वाहा ॥ इदंप्रजापतयेनमम ॥ १० ॥ ॐ
तरतः [1]॥ ॐअग्नये स्विष्टकृते स्वाहा॥ इदमग्नये स्वि
ष्टकृते नमम ॥ ११ ॥ ॐदकोपस्पर्शः॥ एवंहुत्वा पुनः
सायंनिमित्तं पूर्वोक्ता एवैकादशाहुतयोहोतव्याः ॥ ततो
ऽग्निं त्रिः पर्युक्ष्य ॥ गोमयोपलिप्तस्थले दर्भानास्तीर्
र्योदक्संस्थान्पंचबलीन्दद्यात् ॥ ॐधात्रे नमः॥ इदं

टी. १ उत्तर भागमां अगियारमी आहुति होमवी ॥ ॥
२ पछी पाणीनो स्पर्श करवो ॥ एरीते होमी फरी सा
यंकाळ निमित प्रथम कहेलीज अगियार ११ आहुतियो हो
मवी ॥ ते पछी जमणा हाथमां पाणी लइ अग्निनी फरतां
त्रणवार ईशान कोणेथी मांडी ईशान कोणा सुधी फरती धारा
करी प्रथम मुजब पाछो हाथलेइ गायना छांण वडे लीपेला
स्थलमां कुंडनी पासे उत्तरमां अग्र (अणि) रेहे तेम त्रण दर्भो
पाथरी ते उपर उत्तरमां जाय तेम पांच बलि आपवा. ॥ ॥

धात्रे नमम ॥ १ ॥ ॐविधात्रे नमः ॥ इदं विधात्रे नमम ॥ २ ॥ ॐविश्वेभ्योदेवेभ्यो नमः ॥ इदं विश्वेभ्योदेवेभ्योनमम ॥ ३ ॥ ॐसर्वभूतेभ्योनमः । इदं सर्वभूतेभ्योनमम ॥ ४ ॥ ॐभूतानांपतयेनमः । इदं भूतानां पतये नमम ॥ ५ ॥ स्वाचारचतुर्दर्शीपरिशिष्टे तु ॥ "ॐगृह्योक्तदेवताभ्यो नमः" इति षष्ठमपि बलिदानमुक्तं तन्मृग्यं ॥ ततोदक्षिणामुखः प्राचीनावीती सव्यं जान्वाच्य शेषमन्नं सोदकंसर्वबलिभ्योदक्षिणतः पितृतीर्थेन निनयेत् * ॥ ॐपितृभ्यःस्वधा नमः ॥ इति इदं पितृभ्योनमम ॥ एवं दत्वासव्यंकृत्वाप्राङ्मुखउपविश्यतदुत्तरतः ॥ ॐधात्रे नमः ॥ इत्यादि बलिदानं पुनर्दत्वा ततोयज्ञोपवीती प्राङ्मुखोभूत्वा ॥ अप उप

टी. १ स्वा चार चतुर्दशी परिशिष्टमांतो "ॐगृह्योक्तदेवताभ्योनमः" ॥ एरीते छठुं बलिदान कह्युंछे ते जोवा जवुंछे अर्थात् संदेह युक्तछे ॥ ते पछी दक्षिणमां मुख रेहे तेम अपसव्य करी डाबो पग वाली होम तथा बलिदानथी शेष रहेलुं अन्न पाणी सहित सर्व बलियोथी दक्षिण दिशामां पितृतीर्थे (अंगोठो अने तेनी पासेनी आंगलीना मूल भागे) करी रेडवुं.

२ ए रीते बलि आपी सव्य करी पूर्व सामा मुखे बेशी तेनाथी उत्तर भागमां "ॐधात्रेनमः" इत्यादि बलिदान फरीथी आपी ते पछी सव्य करी पूर्व मुखे बेशी, पाणीनो

स्पृश्य ॥ हविष्पात्रं प्रक्षाल्य ॥ उँयक्ष्मन्नेतत्ते नमः॥
इदं यक्ष्मणे नमम॥इति बलिदेशाद्वायव्यां दिशि तज्ज
लं निनयेत् ॥ ततोहस्तं प्रक्षाल्य विश्वानिन इति ति
सृभिर्ऋग्भिरग्निं स्तुयात् * ॥ विश्वानिनइतितिसृणां
वसुश्रुतआत्रेयोग्निस्त्रिष्टुप् ॥ अग्निस्तुतौ विनियोगः ॥
उँविश्वानिनोदुर्गहाजातवेदः सिंधुंननावादुरितातिपर्षि
॥ अग्ने अत्रिवंन्तमसा गृणानो १ स्माकं बोध्यविता
तनूनां ॥ १ ॥ यस्त्वाहृदाकीरिणामन्यमानोमर्त्यम
र्त्योजोहवीमि॥ जातवेदोयशोअस्मासुधेहिप्रजाभिरग्ने
अमृतत्वमश्यां ॥२॥ यस्मैत्वंसुकृतेजातवेदउलोकमग्ने
कृणवस्योनं ॥ अश्विनंसपुत्रिणंवीरवंतंगोमंतंरयिन्न
शतेस्वस्ति॥३॥ततः॥प०॥ स्वरणे वर्णेन च यद्विहीनं
तथैव हीनं क्रियया पि यच्च ॥ तथातिरिक्तं मम तत्क्षम
स्व ततस्तुचाग्ने ! परिपूर्णमेतत् ॥ १ ॥ इतिबृहत्परा

टी. स्पर्श करी हविःपात्र (होमनुं पात्र) धोइ "उँयक्ष्मन्ने०मम" एरीते बलिना स्थानथी वायु दिशामां ते पाणी रेडवुं ॥ ते प छी हाथ धोइ "विश्वानिनो०स्वस्ति" ए त्रण ऋचा वडे अ ग्निनी स्तुति करवी ॥ * ॥

१ ते पछी ॥ "स्वरेण०मेतत्"॥ एरीतना बृहत्पराशरो

शरीकश्लोकेनाग्निं संप्राथ्य तदग्न्यायतनाद्विभूतिमादाय ॥ त्र्यायुषमिति पंचभिर्मंत्रैःप्रतिमंत्रं ॥ ललाटे ॥ १ ॥ हृदये ॥ २ ॥ दक्षिणस्कंधे ॥ ३ ॥ वामस्कंधे ॥ ४ ॥ पृष्ठे ॥५॥ चेति पंचसु स्थानेषु त्रिपुंड्रान्कुर्यात् ॥ ॐत्र्यायुषंजमदग्नेः ॥ ललाटे ॥ १ ॥ ॐकश्यपस्य त्र्यायुषं ॥ हृदये ॥ २ ॥ ॐअगस्त्यस्यत्र्यायुषं ॥ दक्षिणस्कंधे ॥३॥ ॐयद्देवानांत्र्यायुषं ॥ वामस्कंधे ॥४॥ ॐतन्मेअस्तुत्र्यायुषं ॥ पृष्ठे ॥ ५ ॥ दिवा रात्रौ पृथक्पक्षे ॥ "शाकलहोमविधिना" इत्यंते॥" वैश्वदेवाख्यं कर्माहं करिष्ये " इति संकल्प्य होमबलिदानयोर्द्विरावृत्तिंविहाय सर्वं यथावत्कुर्यात् ॥ देवभागकल्प

कश्लोके अग्निनी प्राथना करी ते अग्निना स्थानमांथी विभूति (भस्म) लेइ " त्र्यायुषं " ए पांच मंत्रो वडे मंत्रे मंत्रे ललाटमां ॥ १ ॥ हृदयमां ॥ २ ॥ जमणे खभे ॥ ३ ॥ डाबे खभे ॥ ४ ॥ पछवाडे ॥ ५ ॥ ए रीते पांच ठेकाणे त्रिपुंड्रो करवा ॥ दिवसे अने रात्रे जुदो वैश्वदेव करवो होयतो ते पक्षमां प्रथमना संकल्पमां "शाकलहोम विधिना" ए पदनी अंते "वैश्वदेवा०ष्ये" एम संकल्प करी आहुतिओनो होम अने बलिदाननी बे वारनी आवृत्ति छोडी दइ तमाम जेम प्रयोगलख्यो छे तेम करवो॥ आगलना देव पितृ मनुष्यना भागनी कल्पना

नादिकंकिमपिरात्री न भवतीति गृह्यभाष्ये नारयणे
नोक्तं ॥ तत एकस्मिन्पात्रे यथाशक्ति सघृतमन्नमादाये
तत्त्रिधा विभज्य सकुशजलं गृहित्वा॥"इदमन्नं विश्वे
भ्योदेवेभ्योनमः"॥इदंविश्वेभ्योदेवेभ्योनमम इतित्यजे
त् ॥ ततोदक्षिणाभिमुखोभूत्वाप्राचीनावीती द्विगुण
कुशसहितं जलं गृहीत्वा ॥ अदोगोत्राः अस्मत्पितृपि
तामहप्रपितामहाः अदो३दःशर्माणोवसुरुद्रादित्यरू
पाः सपत्नीकाः ॥ अदोगोत्राः अस्मन्मातामहप्रमा
तामहवृद्धप्रमातामहाः अदो३दःशर्माणोवसुरुद्रादित्य
रूपाः सपत्नीकाः ॥ इदमन्नं यथायथविभागं वः
स्वधा ॥" इति द्वितीयभागमन्नं पितृतीर्थेनसंकल्पये
त् ॥ " इदं अदोगोत्रेभ्योऽस्मत्पितृपितामहप्रपिता

दि कांइपण राते न होय एम गृह्यसूत्रना भाष्यमां नारायणे
कह्युंछे ॥ ते पछी एक पात्रमां शक्ति प्रमाणे घीइ सहीत
अन्न (चोखा) लइ तेना त्रण प्रकारे विभाग करी दर्भ सहित
जल लेइ "इदमन्नंवि० नमम" एम कही ते पाणी हेठे मुकवुं
॥ ते पछी दक्षिण दिशा सामा मुखे अपसव्य करी बेवडा क
रेला दर्भ सहित जल ग्रहण करी "अदोगोत्राः० स्वधा" ए रीते
बिजा भागना अन्ननो पित्रतीर्थे (अंगोठा अने तेनी पासेनी
आंगलीना बे मूलना मध्यभागे) संकल्प करवो ॥ ते पछी ।
इदं अदोगोत्रे० नमम'॥ ए रीते त्याग करवो ॥ ते पछी जनोइ

महंभ्योअदोऽदः शर्मभ्योवसुरुद्रादित्यरूपेभ्यः सपत्नीकेभ्यः॥अदोगोत्रेभ्योऽस्मन्मातामहप्रमातामह वृद्धप्रमातामहेभ्योऽदोऽदःशर्मभ्योवसुरुद्रादित्यरूपेभ्यःसपत्नीकेभ्योन मम" इति त्यजेत् ॥ ततोयज्ञोपवीती प्राङ्मुखोभूत्वाऽप उपस्पृश्य नीवीती सकुशं जलमादाय तृतीयं भागं षोडशग्रासपरिमितं यथाशक्ति वा ॥ इदमन्नं सनकादिमनुष्येभ्योहंतः ॥ इतिमनुष्यतीर्थेनसंकल्प्य ॥ इदंसनकादिमनुष्येभ्योनमम ॥ इतित्यजेत् ॥ ततोयज्ञोपवीती शक्तिश्चेच्छ्रोत्रियं गंधादिभिः संपूज्य संभोज्य तदभावे ब्रह्मचारिणे भिक्षां दद्यात् ॥ ततोदेवतानैवेद्यं ॥ पात्रेसर्वान्नमादायदेवाग्रेनिधाय ॥

सव्य राखी पुरव मोह्ये बेशी पाणीनो स्पर्श करी जनोइ कंठय करी दर्भ सहित जल लइ त्रिजो भाग सोल ग्रास (कोलिया) परिमित अथवा शक्ति प्रमाणे "इदमन्नं० हंतः" ए रीते मनुष्य तीर्थे (छेली आंगळीना मूल भाग) वडे संकल्प करी "इदंसन० मम" ए रीते त्याग करी॥ ते पछी जनोइ सव्य करी शक्ति होयतो श्रोत्रिय (सांगवेदभणेल) ब्राह्मणने गंध विगेरेए पूजी जमाडी तेनो अभाव होय तो ब्रह्मचारीने भीक्षा आपवी ॥ ते पछी देवने नैवेद्य करवुं तेमां पात्रमां तमाम जातिनुं अन्न लइ ते पात्र देव पासे मुकी "ॐचंद्र

"सू. ॐचंद्रमामनसोजातश्चक्षोःसूर्यो॥अजायत॥ मुखा दिंद्रश्चाग्निश्चप्राणाद्वायुरजायत " ॥ १ ॥ इति पठि त्वा " श्रीशिवविष्णुसूर्यविनायकशक्तिभ्योनमः ॥ य थांशतइदंनैवेद्यं समर्पयामि " ॥ ततोगोग्रासमाहृत्य॥ " सौरभेय्यः सर्वहिताः पवित्राः पापनाशनाः ॥ प्रति गृह्णंतु मे ग्रासं गावस्त्रैलोक्यमातरः " इदमन्नं गो भ्योनमः ॥ इदं गोभ्योन मम " ॥ इति त्यजेत् ॥ ततो गृहस्थितबालवृद्धसुवासिन्यादिभ्योभोजनार्थमुप कल्प्य ॥ गोदोहनमात्रमतिथीन्प्रतीक्ष्य समागताश्चे दन्नादिदानेन तान्सत्कृत्य ॥ गृहाद्वहिः श्वादिभ्यो भूमौ बलीन्दद्यात् ॥ यथा * ॥ श्वभ्योनमः ॥ इदंश्व भ्योनमम ॥ १ ॥ ॐश्वपचेभ्योनमः ॥ इदंश्वपचेभ्योन मम ॥ २ ॥ ॐवयोभ्योनमः ॥ इदंवयोभ्योनमम

टी. मा० यत" ए मंत्र भणी 'श्री शिवव्यामि' ए रीते नैवेद्य करी ते पछी गोग्रास (गायनो विभाग) काहाडी "सौरभेय्यः स० नमम " ए रीते तेनो त्याग करवो. ॥ ते पछी घरमांना बालको वृद्ध सुवासिनीवीगेरे (गर्भिणी रोगी कन्या) ने माटे भोजनसारु अन्ननी कल्पनाकरी ॥ गायदोहोतां जेटलोवखत लागे तेटलावखतसुधी अतिथियोनीवाटजोइ ते आव्याहोयतो अन्न वीगेरेना दानवडे तेओनो सत्कारकरी घरथकी बाहार श्वान वीगेरेने भूमिउपर बली आपवा ते आरीते ॥ *

